144 T. 334 # सर्वज्ञानोत्तरम् (9) 144

योगपादः p.p. 1-4

ज्ञानपादः ,, 4-6

पदार्थस्वरूपविचारः ,, 7-13

स्वात्मसाक्षात्कारप्रकरणम् ,, 13-18

भूतात्मादिप्रकरणम् ,, 18-23

मन्त्रातन्त्रोत्पत्तिप्रकरणम्

क्रियापादः

मन्त्रोद्धारप्रकरणम् ,, 23-25

प्रासादमन्त्रोद्धारप्रकरणम् ,, 25-27

परमीकरणविधिः ,, 27-34

शिवार्चनविधिः ,, 34-41

अग्निकार्यविधिः ,, 41-46

भूपरिग्रहविधिः ,, 46-49

पञ्चगव्यादिदीक्षाङ्गविधिः ,, 49-56

अध्वप्रकरणम् ,, 56-76

दीक्षाप्रकरणम् ,, 76-84

पञ्चतत्त्वदीक्षाविधिः ,, 84-88

मृतकदीक्षाविधिः ,, 88-93

उपलेपकाविधिः ,, 94-96

लिङ्गोद्धारविधिः ,, 96-100

अभिषेकप्रकरणम् ,, 100-104

सौदाहकल्पाभिषेकविधिः ,, 104-105

व्रतादिप्रकरणम् ? ,, 105-108

प्रतिष्ठाप्रकरणम् ,, 108-122

जीर्णोद्धारप्रकरणम् ,, 122-12[illegible]

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रतिमादिप्रकरणम्		P.P. 125-128
सिद्धिसाध्यकादिप्रकरणम्		,, 128-132
भिक्षाचर्यादिप्रकरणम्		,, 132-135
वारुणस्नानप्रकरणम्		,, 136-137
भस्मस्नानविधिः	सर्वज्ञानोत्तर पादः (चर्यापादः)	,, 137-139
कमण्डलुप्रकरणम्	,,	,, 139-140

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. No. 334

२

॥सर्वज्ञानोत्तरम्॥

D 5550

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

D5550

श्री गुरुभ्यो नमः

45 A

"सर्वज्ञानोत्तरम् । योगपादम्"

= ·x· =

नमः शिवाय शान्ताय बिन्दवे शाश्वताय च ।

गुरवे च गणेशाय कार्तिकेयाय धीमते ॥१॥

अतः परं प्रवक्ष्यामि योगमाकलितस्तुतम् ।

शान्तस्य . . . . . . ॥२॥

युक्ताहार विहारस्य युक्त चेष्टस्य कर्मसु ।

युक्तस्वप्नावबोधस्य तत्त्वतः शृणु षण्मुख ॥३॥

ध्येयध्याता यथा तद्ध्यानं तद्वर्णनं प्रयोजनम् ।

सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति ॥४॥

आत्मा ध्याता मनो ध्यानं ध्येयः सूक्ष्मो महेश्वरः ।

यत्परा परमैश्वर्यमेतद्ध्यान प्रयोजनम् ॥५॥

मानामानौ समौ कृत्वा सुख दुःखे समे तथा ।

एवं जयं विवादं च त्यजन् योगमभ्यसेत् ॥६॥

शून्यागारे मठे रम्ये देवतायतने गुहे ।

नदीतीरे विविक्ते च गहे घोर वने पि वा ॥७॥

प्रच्छन्ने च विविक्ते च निश्शब्दे जनवर्जिते ।

योगदोष विनिर्मुक्ते निर्विकल्पे निरातपे ॥८॥

स्नात्वा शुचि समभ्यर्च्य प्रणम्य शिरसा शिवम् ।

योगाचार्यान्नमस्कृत्य योगं युञ्जीत मा . . . ॥९॥

पद्मकं स्वस्तिकं वापि उपस्थाप्यं वापि तथा । पीठार्धं गर्धचन्द्रं वा सर्वतो-भद्रमेव वा ॥१०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आसनं साधयेद्बद्धो ऋजुकायः समं शिरः ।
सर्वसंगात् परित्यज्य निःसंगं मनो गतः ॥ ११ ॥
न दन्तैः संस्पृशेद्दन्तान् स्थिरीकृत्य च जिह्वया ।
किंचित्कुञ्चितनेत्रस्तु शिवं सम्यक् तदो ध्यायेत् ॥ १२ ॥
45 B ....त.... च न यानि तत्त्वानि तन्मात्राण्यानि देहिनाम् ।
पुनर्विनेशिकश्चैवास्त्रयुक्ता षडानन ॥ १३ ॥
न पृथक् हृदयं तस्य न शिरो न शिखा गुह ।
वर्मास्त्रनेत्रसाकृतं तस्मादेव प्रवर्तते ॥ १४ ॥
प्राणापानौ समौ कृत्वा सुषुम्नान्तरचारिणौ ।
तयोर्वृत्तिं निरुध्यात्मा शिवं ध्यायेद्विचक्षणः ॥ १५ ॥
भावनाभावसंयुक्तो ज्योतीरूपं सुनिर्मलम् ।
सुसूक्ष्मं व्यापकं नित्यं निर्विकल्पं सदा बुधः ॥ १६ ॥
उत्तमा मध्यमा मन्दोऽस्य सर्गास्त्रिविधाः स्मृताः ।
प्राणायामं स तान् कुर्यात् पूरकुम्भकरेचकान् ॥ १७ ॥
प्राणायामैर्दहेद्दोषान् धारणाभिः स्तुतम् ।
प्राणायामो भवादेय पूरको देहपूरकः ॥ १८ ॥
(श्वा)
निधाय सर्वद्वाराणि निरुच्छ्वासोच्छ्वासवर्जितः ।
सम्पूर्णकुम्भवत्तिष्ठेत् प्राणायामः स कुम्भकः ॥ १९ ॥
ततो ऊर्ध्वं रेचयेद्वायुं मृदु निश्वाससंयुतम् ।
रेचकस्त्वेव विख्यातः प्राणसंशयकारकः ॥ २० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रसार्य भागा हस्तं तु, जानुं कृत्वा प्रदक्षिणम्।

छोटिका ततो दद्यान्मात्रैषा सामि भाष्यते ॥21॥

मात्रा द्वादश विज्ञेयाः प्रमाणं तालसंज्ञकम्।

ताल द्वादशकं ज्ञेयं प्राणायामस्तु कन्यसम् ॥22॥

मध्यमस्तत् द्विशा ज्येष्ठ... द्विगुणो भवेत्।

शैलकां वर्धमात्रां प्रत्यहं योगवित्तमः ॥23॥

नैरन्तरेण विलम्बेन क्रमेणैव विवर्धयेत्।

46 A प्राणायामोत्तमो यत्र द्विगुणा धारणा मता ॥24॥

धारणा द्विगुणो योगो योगोऽपि द्विगुणो कृतः।

योगसिद्धिरिति ज्ञेया शिवेन परमात्मना ॥25॥

तदानु पश्यते स्वस्थं गन्धतन्मात्र मात्मनि।

रसं तेज स्पर्शं इतिश्च शब्दतन्मात्र मेव च ॥26॥

पश्यते कर्मयोगेन वर्णभावैः पृथग्विधैः।

अहंकार मनोबुद्धिं गुण मव्यक्त पौरुषम् ॥27॥

अभिव्यक्तानि जानीया स्वस्वधर्म गुण लक्षणात्।

विद्यां कलां ततः कालं मायां विद्यां ततः परम् ॥28॥

दृष्ट्वा तु क्रमशः सर्वान् पुनरस्त्रेण भेदयेत्।

विद्येश्वरं ततस्तत्त्वं तथा सादाशिवं परम् ॥29॥

भित्वा तु क्षुरिकास्त्रेण ततः स्वस्थं शिवं विशेत्।

अमृतात्मा शिवः साक्षात् तदनाविष्टस्तु योगवित् ॥30॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वज्ञस्सर्वगस्स्वस्थस्सर्वेशस्सर्वकृद्भवेत् ।

सर्वेष्वेव सशास्त्रेषु ज्ञेयं वस्तु चतुष्टयम् ॥३१॥

पशुः पाशः पतिश्चैव शिवश्चेति यथाक्रमम् ।

ज्ञात्वा तु तत्त्वसद्भावं तन्त्रसारं तु दुर्लभम् ॥३२॥

सर्वथा वर्तमानोऽपि स्पृशति न पुनस्तनुम् ॥३३॥

॥ इति योगपादः समाप्तः ॥

पशुपाशविधानं हि श्रोतुमिच्छामि तत्त्वतः ।

संयोगश्च तथा तेषां कथयस्व महेश्वर ॥१॥

अणवः पाशसततस्तेषां जीव आत्मस्तु किन्तु वै ।

५६ ३ के पाशाः के मलाः प्रोक्ताः कर्माण्यपि कुमानिनि ॥

पतिश्च किंविधो ज्ञेयस्सोऽधिकार पदे स्थितः ।

शिवश्च कीदृशः प्रोक्तो योऽधिकार विवर्जितः ॥३॥

ईश्वरः — पशुरात्मा स्वतन्त्रश्च चिन्मात्रो मलद्रावितः ।

सम्मुक्तो नित्यसंसारी किञ्चिद् ज्ञानीश्वरो क्रियः ॥४॥

ताम्रस्यैव तु हेमत्वमन्तर्लीनं यथास्थितम् ।

अन्तर्लीनं तथा ज्ञेयं शिवत्वं पुद्गलस्य तु ॥५॥

रससिद्धं यथा ताम्रं हेमत्वं प्रतिपद्यते ।

तथात्मा ज्ञानसम्बन्धाच्छिवत्वं प्रतिपद्यते ॥६॥

(५)

यथा ज्ञात्वा विभागेन भं यासि संस्थितम् ।

तथात्मा पाशसंश्लिष्ट अपि भागेन संस्थितः ॥७॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विनाप्रहारं कुरुते ... ध्यानबलैर्यथा।

कुरुते पाशविश्लेषं तथाचार्यः शिवाध्वरैः ॥ 8 ॥

मन्त्रौषधबलैर्यद्वत् संनिरोधो विलक्ष्यते।

तथा हि सर्वपाशानां संनिरोधस्तु दीक्षया ॥ 9 ॥

दह्यते ध्मायमानानां धातूनां तु यथा मलम्।

(कं)

तथाचार्यो देहस्थानां बाह्यभूतो मलापकौ ॥ 10 ॥

गुणभूताः स्मृताः पाशाः धर्माधर्मौ मलौ स्मृतौ।

सहजौ साधकज्ञानां तावत्कालिक वर्णितौ ॥ 11 ॥

(स्त)

त्रिविधास्ते स्मृताः पाशाः सहजागन्तुका स्मृताः।

सांसर्गिकास्तथा ज्ञेयः शृणु तेषु विनिर्णयम् ॥ 12 ॥

तन्मात्रा यास्तु ये तत्त्वास्सूक्ष्मास्सर्वगा गुह।

ते तु पाशाः पराः प्रोक्तास्सहजास्सर्वजन्तुषु ॥ 13 ॥

इन्द्रियाणि च भूतानि यद्बीजं तेषु सम्भवम्।

47 A आगन्तुकाः स्मृता ह्येते सञ्ज्ञा सांसर्गिकाः पुनः ॥ 14 ॥

संसर्गात्सम्भवत्कर्म दुष्टं वा यदि वा शुभम्।

ते ते सांसर्गिकाः पाशाः सुखदुःखफलप्रदाः ॥ 15 ॥

कर्मणां तु शरीराणि भावाः कर्मोदयो भवेत्।

पूर्वोपार्जितकर्मणां भावः संयोगकारकः ॥ 16 ॥

ईश्वरोऽग्रजकस्तेषां भवेत्कर्मानुरूपतः।

कर्मोदयान्मृते सृष्टिरपास्तैः प्रलयं विदुः ॥ 17 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विषयासङ्गदोषेण गुण संगो शिखि इवत।
बन्धं नाप्नोति पुरुषो अकर्ता सर्वगोऽपि सन् ॥१८॥
पिता पुत्रापराधेन यथैकस्थो निबध्यते।
अकर्ता पीह पुरुष स्तथा बन्धं न चाप्नुयात् ॥१९॥
यथैव लोहसंयोगात् उदासीनो पि मानव:।
तथा बन्धमवाप्नोति तथा ज्ञेयस्तु पुद्गल: ॥२०॥
अनादि निधना: पाशा जीवो नाथस्तु कीर्तित:।
तच्छेदकस्तथा नादि: पशु पाश पतिस्तु स: ॥२१॥
पतिस्सदाशिवो ज्ञेयो मन्त्रात्मा मन्त्रविग्रह:।
सर्व मन्त्राधिपश्चासौ सृष्टि संहार कारक: ॥२२॥
पद वर्णादिभिर्युक्तै: पूज्यते सर्वदा तु स:।
अशेषभुवनाधारो योग पीठासन स्थित: ॥२३॥
पतिरेवं समाख्यात स्सर्व काम फल प्रद:।
स्थूल सूक्ष्मोपि निर्दिष्टो वं रूपस्तु संस्कृत: ॥२४॥
शिवतत्त्वं परं तस्मात् मन्त्रातीतो निरञ्जन:।
निराभयो निराकारो वर्णरूप विवर्जित: ॥२५॥
47 B सर्वज्ञ: सर्वगश्शान्त: सर्वात्मा सर्वतोमुख:।
अतीन्द्रियो निरालम्ब: सूक्ष्म: शाश्वतो ध्रुव: ॥२६॥
सकल जगदाव्यापिन अप्रमेयो ह्यनौपम:।
बहिरन्तर्विभागेन तिले तैलमिव स्थित: ॥२७॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

" आत्मसाक्षात्कारप्रकरणम् "

अथातः संप्रवक्ष्यामि उपायं तत्त्वतो गुह ।
अङ्गानि स्वक्षमत्वे सर्वगस्य तु निष्कलम् ॥ १ ॥
येन विज्ञायते सम्यक् यं ज्ञात्वा शिवो भवेत् ।
नैकस्य विज्ञाया ख्यातं तद्विज्ञानं शृणुष्व मे ॥ २ ॥
गुरुपारम्परायात मदृष्टं सर्वदर्शिभिः ।
भवबन्धविमोक्षार्थं परमं सर्वतो मुखम् ॥ ३ ॥
योऽसौ सर्वगतो देवो सर्वात्मा सर्वतोमुखः ।
सर्वतत्त्वमयो नित्यः सर्वस्योपरि संस्थितः ॥ ४ ॥
सर्वतत्त्वव्यतीतश्च वाङ्मनो नाम वर्जितः ।
सोऽहमेवमुपासीत निर्विकल्पेन चेतसा ॥ ५ ॥
यदेव निर्विकल्पं ज्ञानं शाश्वतं ध्रुवमव्ययम् ।
निर्विकल्पमनो दृश्यं हेतुदृष्टान्तवर्जितम् ॥ ६ ॥
अलिङ्गमक्षरं शान्तं विषयातीतगोचरम् ।
अविभाज्यमलदेहं तदहं नात्र संशयः ॥ ७ ॥
अहमेव परो देवः सर्वमन्त्रमयः शिवः ।
सर्वमन्त्रव्यतीतश्च सृष्टिसंहारवर्जितः ॥ ८ ॥
मया (व्या)प्तमिदं सर्वं दृश्यादृश्यं चराचरम् ।
अहमेव जगन्नाथो मत्तः सर्वं प्रकाशते ॥ ९ ॥
अनेकाकार संभिन्नं विश्वं भुवनसञ्चयम् ।
शिवादवनिपर्यन्तं तत्सर्वं मयि संस्थितम् ॥ १० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

५८ A यच्च किञ्चिज्जगत्यस्मिन् दृश्यतेऽदृश्यतेऽपि वा।

बहिरन्तर्विभागेन तत्सर्वं व्यापितं मया ॥ ११ ॥

अहमात्मा शिवो ह्यन्यः परमात्मेति यः स्मृतः।

भावमुपासयेन्मोही न शिवं समवाप्नुयात् ॥१२॥

शिवोऽन्यः स्वाहमेवान्यः पृथग्भावं विवर्जयेत् ॥

यः शिवः सोऽहमेवेति अद्वैतं भावयेत्सदा ॥१३॥

अद्वैतभावना युक्तः सर्वत्रात्मनि संस्थितः।

सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः ॥१४॥

भावमेकात्म भावेन संस्थितस्य तु योगिनः।

सर्वज्ञत्वं प्रवर्तेत विकल्परहितस्य च ॥१५॥

योऽसौ सर्वेषु शास्त्रेषु पठ्यते ह्यज ईश्वरः।

अकायो निर्गुणो ह्यात्मा सोऽहमस्मिन्न संशयः ॥१६॥

अविज्ञातः परः सोऽहि सृष्टिवर्णसमाश्रितः।

विज्ञात शाश्वतस्वस्थः स शिवो नात्र संशयः ॥१७॥

तमात्मानं सदा नेयः सुविचार्यैः विचक्षणैः ।

परापरविभागेन स्थूलसूक्ष्मविभागशः ॥१८॥

परः परमनिर्वाण अपसृष्टि भेदतः ।

स्थूलो मन्त्रमयः प्रोक्तः सूक्ष्मो ध्यानैकसंस्थितः ॥१९॥

अपरो बहुशो नेन क्रियुक्तेन षडानन ।

नानाविकल्पविशेषेण मनःसंमोहकारिणी ॥२०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वे धर्मा न सन्तीति यत्नेन परिकल्पयेत्।

तत्र ध्रुव त्यसंदेहा सदा तद्भाव भावतः॥ २१॥

इत्येव मात्मविज्ञानं कथितं तु समासतः।

48 B ज्ञात्वैवात्म मयं सर्वं मात्मानं पर्युपासते॥ २२॥

न तत्र देवा वेदा वा यज्ञा वा बहुदक्षिणाः।

आत्म विज्ञान मात्रेण विमलं सर्वतो मुखम्॥ २३॥

संसारार्णव मग्नानां भूतानां शरणार्थिनाम्।

नान्यः शरणदः कश्चिदात्मज्ञानादृते क्वचित्॥ २४॥

आत्मानं परमं भूत्वा यो विजानाति तत्वतः।

स मुच्यते वयनेन सर्वावस्थां गतोपि सन्॥ २५॥

आत्मलाभा परो लाभः क्वचिदन्यो न विद्यते।

तस्मात्मान मुपासीत ध्येय मात्मा परस्तु सः॥ २६॥

न प्राणो नैव चापानो विशिष्ट करण स्तथा।

सर्वज्ञं तु तमात्मानं परिपूर्णं सदा स्मरेत्॥ २७॥

न चैवाभ्यन्तरं बाह्ये नाति दूरे समीपतः।

स निष्कलो परे स्थाने तत्र चित्तं निवेशयेत्॥ २८॥

तिर्य गूर्ध्व मधश्चैव बहिरन्तश्च निराशः।

सर्वशून्यं तमात्मानं समात्मानं भावयेत्सः॥ २९॥

नैव शून्यं च चाशून्य मशून्यं शून्य मेव च।

पक्षपात विनिर्मुक्तो मात्मानं पर्युपासयेत्॥ ३०॥

निरामय निराकारं वर्णरूप विवर्जितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निरञ्जनं गुणातीतं ममात्मानं पर्युपासयेत् ॥ ३१ ॥
निरामय निरालम्ब मप्रमेय मनोपमम् ।
स्वभाव विमलं नित्य ममात्मानं पर्युपासयेत् ॥ ३२ ॥
सन्यस्य सर्व कर्माणि निःस्पृहः सङ्गवर्जितः ।
भावये दात्मनात्मानं मात्मन्येवात्मनि स्थितम् ॥ ३३ ॥
स देश जाति सम्बन्धान् वर्णाश्रम समन्वितान् ।
५१ A भावान् तान् परित्यज्य स्वरूपं भावयेद् बुधः ॥ ३४ ॥
मन्त्रोऽयं देवता होवा इदं ध्यानमिदं तपः ।
सर्व भावान् परित्यज्या त्मा भावं तु भावयेत् ॥ ३५ ॥
अभावं भाव माश्रित्य भावं कुर्या न्निराश्रयम् ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ ३६ ॥
नैव चिन्त्यं न चाचिन्त्यं नाचिन्त्यं चिन्त्यमेव च ॥
पक्षपात विनिर्मुक्तं ममात्मानं पर्युपासयेत् ॥ ३७ ॥
अचिन्त्यं चिन्तये न्नित्यं कृत्वा चित्तं निराश्रयम् ।
निस्तले निष्कलीभूते बिन्दत्यात्मनि यत्सुखम् ॥
निर्विकल्प मचिन्त्यं च हेतु दृष्टान्त वर्जितम् ।
तत्सुखं परमं प्रोक्त मात्माधीन मनोपमम् ॥
निरस्य विषया सङ्गं मनोवृत्तिं विवर्जयेत् ।
यदा यात्युन्मनी भावं तदा तत्परमं सुखम् ॥ ४० ॥
सर्व दिग्देश कालेषु योगाभ्यासो विधीयते ।
सर्व वर्णाश्रमाणां च ज्ञानभेदो न विद्यते ॥ ४१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गत्वा गत्वैकवर्णानां क्षीरस्था क्षयं न वर्णताः।

क्षीरस्वच्छवत् ज्ञानं भङ्गिनश्यन्तु गतांस्तथा ॥ ४२ ॥

यथा सर्वगतं व्योम व्यापकं सर्वतो मुखम्।

तथा प्राणिसंस्थानं दिग्देशाने विचारयेत् ॥ ४३ ॥

नैव तस्य कृतेनार्थो कार्यं न विधिस्मृतः।

न लिङ्गं नाप्याचारः परमात्मनि संस्थितः ॥ ४४ ॥

गच्छन् तिष्ठन् स्वपन् जाग्रन् भुञ्जानोऽपि जिघ्रन्नपि।

सर्वदा सर्वकालेषु वातशीतातपेषु च ॥ ४५

५९ B नाथ दारिद्र्य रोगेषु मध्याह्ने ज्वरकादिषु।

आत्मध्यानाञ्चितः शान्तः आत्मतृप्तस्तु निर्व्यग्रः ॥ ४६ ॥

नागतोऽहं गतो नापि नागमिष्ये न गच्छता।

न भूतो न भविष्यामि तत्त्वस्य स्थिरधर्मणी ॥ ४७ ॥

प्राकृतानि तु कर्माणि प्रकृतिः कर्मसंभवा।

नाहं किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ॥ ४८ ॥

नैवः प्रकृतिबन्धोऽस्ति मुक्तिरित्यभिधीयते।

न लेप प्राकृतैर्धर्मैर्लिप्यते कदाचन ॥ ४९ ॥

निर्दग्धतस्तु यथा दीपो यद्वत्प्रकाशते।

आत्मात्मैव परोक्षात्मा स्वैक्यैर्वा ज्ञानजं तमः ॥ ५० ॥

स्नेहक्षयात् यथा दीपो बलान्निर्वाणमृच्छति।

तथा योगाभ्यासयुक्तो ब्रह्मण्येवावतिष्ठते ॥ ५१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

घटसंवृतमाकाशं नीयमाने यथा घटे।

घटो नियाति नाकाशः नाकाशत्वं प्रपद्यते ॥ 52 ॥

विभिन्ने प्राकृते देहे तथात्मा परमात्मनि।

इत्येवमाधिकारेण सर्वज्ञेनाधिकारिणा ॥ 53 ॥

सर्वबन्धाद्विनिर्मुक्तः सर्वज्ञः सर्वगो भवेत् ॥ 54 ॥

तदागमात् परिहृत्य सर्वान् शुद्धं गृहीत्वात्मनिनादियोगम्।

असत्फलं नास्त्यादिहास्ति किञ्चिद् ज्ञानमेव संत्यज्य मनोविकल्पनम्॥

विज्ञानमेव समुपास्य विद्वान् विशास्यमानं सततं नियुक्तः।

50 A सर्वत्र गामी भरतीह मुक्तस्तद्धर्मधर्मी विहरन्त संस्थः ॥ 56 ॥

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।

(स्व)
अनन्तशक्तिश्च विराजमानो विशुद्धदेहश्च शिवत्वमेति॥

(जपो)
न जोपे नार्चनं ध्यानं न होमो नैव साधनम्।

धर्माधर्मफलं नास्ति न पिण्डो नोदकक्रिया ॥ 58 ॥

नियमानि न तस्यास्ति नोपवासो विधीयते।

प्रवृत्तिर्न निवृत्तिश्च कर्म धर्मव्रतानि च ॥ 59 ॥

आग्नेः प्रवेशनं नास्ति पतनं भृगुतोदके।

शिवज्ञानामृतं पीत्वा विचरन्ते यथा सुखम् ॥ 60 ॥

शिवश्चाश्रितः शुद्धः सर्वधर्मविवर्जितः।

सत्यं सत्यं पुनः सत्यं त्रिसत्यं समयः कृतः ॥ 61 ॥

अतः परतरं नास्ति विज्ञेयं कुमारिज्ञह।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विमलयति सर्वभावान् विमलात्मा विमलबुद्धिरस्तद्दृढधीः॥

सर्वं विमलं पश्यति विमलो विमलेन भावेन।

जाग्रत् जाग्रत् जाग्रत् स्वप्नं तथा जाग्रत् सुषुप्तिकम्॥ 63॥

जाग्रत् तुर्यं काल पर मतीतं पर दर्शनम्॥

विश्वजाग्रत्स्वो च शान्तश्च शिव दर्शन मेव च॥ 64॥

सायुज्यमिति भेदेन षोडर्शं मेवा दश प्रकीर्तितः॥ 65॥

— x —

॥ पिण्डी करणम् ॥

परं भूयः प्रवक्ष्यामि पिण्डीकरणमुत्तमम्।

यथात्मा जीव संस्थितः ॥

50 B. मन्नात्मा परमात्माश्च तन्मात्रान्तरं तु हि।

पृथिव्यापस्तथा तेजो वायुराकाश मेव च॥ 2॥

संयोगः सर्वभूतानां भूतात्मा संप्रकीर्तितः।

पुरुषाधिष्ठितैर्बीजैस्तन्मात्रैर्बीजसंयुतैः॥ 3॥

संभवन्ति महाभूता मलमायातु संभाविताः।

सर्वेन्द्रिय समायुक्तं शरीर मिति प्रोच्यते॥ 4॥

विनाशो भवति देवाच्च तच्चाहार मयं विदुः॥

(हार)?
आहारस्य परिणामो रसो भवति र्भविष्यति।

रसाच्छोणितम्। शोणितान्मांसं मांसान्मेदो मेदसोऽ-

स्थीनि अस्थिभ्यो मज्जा मज्जातः शुक्लं शुक्ल शोणित-

संयोगो वायुसंयोगात् कललः संभवते। यथा गर्भे बीजवीर्यं योनि-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्र शरीर मध्ये नाभिः। नाभिस्थाने मलः। मलस्थाने यथा
तिष्ठति वातपित्तश्लेष्माणः इति त्रयो मल संगृहीत। ऋतुका-
ल संयोगात् पुंसो रेत आधिक्याद् पुरुषो भवति। मातृ-
रक्ताधिक्यात् स्त्री प्रजायते। उभयोस्तुल्ये नपुंसकम्। अथ
व्याकुल खंज कुब्ज वामना जायते। परस्परा कुलत्वादन्योन्य-
वायु पीडिता तु स्त्री पुंसां संयोग वैषम्यात् शुक्लं तद्विधं भवति।
तेन युग्मं प्रजायते। एक रात्रोषितं कललं सप्त रात्रेण बु-
द्बुदम्। सप्त रात्रेण मांस पेशी संभवति। द्विसप्त रात्रेण मांस
पिण्डाकृति र्भवति। मासाभ्यन्तरे बाहु रंसौ जायते।
मासद्वयेन हस्त पादा कुक्ष्यादयो जायन्ते। त्रिभि र्मासै-
र्जरायु स्नायु त्वक् (चि) न र्मा भवन्ति। चतुर्भि र्मासै र्वंश पृष्ठ-
5| A उरः कटिश्च भवति। पञ्चभि र्मासैः शिरो ललाट कर्णनासा
भवन्ति। षड्भि र्मासैः इन्द्रियाणि भवन्ति। सप्तभि र्मासै र्शरी-
रस्य व्याप्ति र्भवति। अष्टभि र्मासैः पूर्णाकृति र्भवति। नवभि-
र्मासै स्सर्वाङ्ग युक्त चेतनो भवति। पूर्व जातिं स्मरति। सोऽहमि-
त्येवं चिन्तयति। चेष्टयति। घटात् घट इव ~~[illegible]~~ म्बु तोयले-
श्यते। स्वच्छत्वादादर्श नीलो यथा। तस्मात्पञ्चभूतात्मक सं-
मायुक्तं चेतनं। बुद्धि रहङ्कारो मनः प्रकृतिश्च प्राकृतः पुरु-
ष्च मनसा संकल्पं करोति।
ध्रु प्राण मनसा युक्त इन्द्रियैः सह युज्यते। इन्द्रियाणि ततो विषु-
विषयेषु प्रवर्तते॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इत्येवं प्रकृति सम्भवं शरीरं प्रत्ययैश्चेष्टितं यत् । भासत्वात्

सत्त्वरजस्तमः इति पुरुषस्य स्वभावभेदं कुर्वन्ति ॥

सत्त्वं प्रकाशकं भावं रजो रागात्मकं गुह ॥ १९ ॥

तमो मोहात्मकं भाव मुत्पादयति देहिनाम् ॥

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ २० ॥

तमसो सत्यमज्ञानं प्रमादालस्यमेव च ।

सत्यासत्ये दया शौर्यं वितर्क ऐश्वर्यमेव च ॥ २१ ॥

रजसः क्रोधसंभाव निद्रा सत्त्वं च जायते ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।

जघन्यगुण प्रवृत्तिस्था अधो गच्छन्ति तामसाः ॥

रजस्तमश्चाभिभूय सत्त्वं वर्धति षण्मुख ॥ २३ ॥

रजस्सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा ।

S/B अनेन स्वेते पुरुषो भाति संगात्सदा गुणात् ।

सोऽस्मात् योधिको भूत्वा स्वधर्मं विनियोजयेत् ॥

(बी)
शृणु मेऽक कपालस्य षोडश पार्श्व पटलानि भवन्ति । त्रीणि

षष्टि शतानि नव स्नायुशतानि नव द्वाराणि । मज्जा पंच

पलानि मेदः प्रस्थद्वयं त्रिस्रोऽर्ध रोमकोट्यः । डाकादं

शोत्तरं मांशित प्रस्थ पलानि अष्टौ रुधिरस्याऽऽढकद्वयम्

द्वादश पलानि लिंग जिह्वा । कृष्णं सार्धं पल पञ्चमलम् ।

शुक्लस्य कुडवत्रयम् । पित्तस्याढकम् । सप्त सिरा शतानि च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनियतमूत्रपुरीषमाहारस्यानियतं भावाद्विशेषम्।
एवं विधो येऽमृतात्मा पुरुष इति प्रोच्यते॥
योऽन्तरे वर्तते शब्दस्तस्य वाचा प्रवर्तकः॥२९॥
प्राणापानसमायोगात् सोऽन्तरात्मा प्रकीर्तितः।
तस्मात् सर्वशास्त्राणि संस्कृतप्राकृतानि च॥३०॥
देशभाषादिभिन्नानि विविधं सर्वं प्रवर्तते॥
पशवश्च मृगाश्चैव पक्षिणश्च सरीसृपाः॥३१॥
यावन्तः केचन सत्त्वा उच्चरन्ति सदा रुतम्।
सूक्ष्मा वै पञ्च तन्मात्रा मनोऽहंकार एव च॥३२॥
बुद्धिरष्टगुणा ज्ञेया गुणाध्यक्षं च पौरुषम्।
कला कालस्तथा माया विद्या विद्येश्वरं च यत्॥३३॥
सदाशिवं तथा तत्त्वं बिन्दुं शान्तमेव च॥
एतेषां चैव संयोगात् तत्त्वात्मा पुरुषः स्मृतः॥३४॥
ततं मन्त्रैः संगत्कृत्स्नं पाशाश्लेते मलाः॥ (ते)?
52 A सुसूक्ष्मः सर्वगो नित्यः सहजः सर्ववस्तुषु॥३५॥
प्रकृतिश्चैव बोद्धव्या प्रक्रिया च विमृश्यते।
नैवं प्रक्रियाज्ञानात् न शिवाद्यापकं परम्॥३६॥
न योगाभ्यासतः सिद्धिर्न शानात् परं सुखम्।
उदयो यस्य तत्त्वस्य देहे भवति षण्मुख॥३७॥
तद्वशात्मकं सदा देही विकारमनुवर्तते।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ते
यदि तस्य रतिर्भूतात्मा तत्र तत्त्वं वृथा सर्वशः ॥ ३८ ॥

आत्मा ये सर्वतत्त्वानि सम्पन्नतन्मयतां व्रजेत् ।

मुहुर्मुहुः स देही सर्वतत्त्वैरनुक्रमात् ॥ ३९ ॥

संस्काराच्च विजानाति व्यापकत्वं च सर्वदा ।

तत्त्वात्तत्त्वं यदा स्वच्छं तत्त्वभावैः पृथग्विधैः ॥ ४० ॥

लक्ष्यते व्यापकत्वापि उदयास्तमनादिभिः ।

तथा तत्त्वादिभावभावात् पश्यति षडानन ॥ ४१ ॥

सर्वधर्मनयो ह्यात्मा यथा नानां फलं लक्षयेत् ।

यस्मिंस्तिष्ठेत रतिं याति तत्रैव परिसेवते ॥ ४२ ॥

तस्मिंस्तत्त्वे स्थितिं विद्यात् तत्त्वज्ञेन समाचरेत् ॥

तत्त्वादेवं विदित्वा तु शिवतत्त्वे निराश्रये ।

निर्विकारे निराधारे रतिं कुर्याद् द्विजर्षभः ॥

न पुनर्मोहमायाति तस्मिंस्तत्त्वे षडानन ॥ ४४ ॥

स्थित्वा तस्मिन्नन्तकालेऽपि वरं निर्वाणमाप्नुयात् ।

देही सर्वगतः सूक्ष्मः पुराणः शाश्वतो ध्रुवः ॥ ४५ ॥

व्यापकः सर्वतत्त्वानां भोक्ता कर्ता सनातनः ॥

अस्वतन्त्रो निबद्धश्च चिन्मात्रो मलदूषितः ॥ ४६ ॥

52 B संप्रोक्तो नित्यसंसारी किञ्चिज्ज्ञो निष्कलो क्रियः ।

पशुधर्मो ह्ययं संज्ञेयः शिवधर्मस्ततोऽन्यथा ॥ ४७ ॥

पशुधर्मो ह्यतः पुंसो ह्यनेकाकारसम्भृतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्मा जन्तुः पुमान् देही पुरुषः पुद्गली तथा ॥ ५८ ॥
जीवः कपाली क्षेत्रज्ञः पर्याया ऽस्य नामतः ॥
सर्वे धर्मास्ततः सन्ति संयुक्ताः सर्वकर्मभिः ॥ ५९ ॥
सर्वान् देहानवाप्नोति याति सर्वासु योनिषु ।
यावन्नो लभते ज्ञानं तावज्ज्ञानाति कर्मणा ॥ ६० ॥
अज्ञानाद्धृतदेहस्तु दुःखशोकपरिप्लुतः ।
ज्ञानी लब्ध्वा परं शान्तं नाचिरेणाधिगच्छति ॥ ६१ ॥
तदा तु सर्वदुःखानां हानिरस्योपजायते ।

इति भूतात्मादिप्रकरणं समाप्तम् ॥

अतः परं प्रवक्ष्यामि पुरुषं मन्त्रविग्रहम् ।
सर्वशोकहरं दिव्यं सर्वपापहरं परम् ॥ १ ॥
सर्वदेवासुरयक्षाणां किन्नरोरगरक्षसाम् ।
पितृमातृगणानाञ्च सिद्धविद्याधरादिषु ॥ २ ॥
नागगन्धर्वतिर्यक्षु पिशाचानां च मानुषाम् ।
शिवादिसर्वतत्त्वानां मन्त्रा विद्यन्ते शाश्वताः ॥ ३ ॥
नास्ति मन्त्रैर्विना किञ्चित् सर्वस्थावरजङ्गमम् ।
यावन्तः केचनस्तत्त्वा मन्त्रा ह्योष्ठितविग्रहाः ॥ ४ ॥
यस्य यस्य हि तत्त्वस्यादिमन्ते यदक्षरम् ।
53 A षष्ठं त्रयोदशान्तेन तारेण तारेण नियोजयेत् ॥ ५ ॥
तं तं मन्त्रं विजानीयात् सर्वतत्त्वात्मकं वरम् ।
बिन्दुना संवृतं मूर्ध्नि सर्वकामफलप्रदम् ॥ ६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तेषां मन्त्राणि युज्जीत न काक्षां एतेषु कीर्तितः।
दीर्घ जिह्वा स्मृता ह्यङ्गा नेत्राणु स्वार संयुतः॥ ७॥
स विसर्गस्मृतो ह्यस्त्रा स्तोणु स्वार विवर्जितः।
इति तेषां तु बीजानां मूर्द्धनी बिन्दु प्रदापयेत्॥ ८॥
ॐ कार दीपितां मन्त्रां नमस्काराद्न्त योजिता।
अर्चनेन प्रयोक्तव्या होमे स्वाहान्त योजिताः॥ ९॥
आवाहनासन पात्रेषु स्थापना यजनेषु च।
स्नपने मन्त्र विन्यासे धारणा ध्यान कर्मसु॥ १०॥
पूजा बलि विधानेषु जप होम क्रियासु च।
शिवस्य यो विधिः प्रोक्तः सर्व कर्म क्रमेषु च॥ ११॥
सर्वेषां मै(दै)वतत्वानां तं विधिं परिकल्पयेत्।
अनुक्तं यत्र किंचित् तत्सर्वं हृदयेन तु॥ १२॥
एवं विधिं विधान ज्ञो बुद्ध्या कर्म समारभेत्॥।
परमी करणं प्रोक्तं सर्वतत्वेषु मन्त्रवित्।
यो ये नै(औ)व जपेन्मन्त्रो वाच्य वाचक भेदतः॥ १२॥
स्थूल सूक्ष्म परस्तो हि मन्त्राणां पुरुषः स्मृतः॥
स्थूलस्तु वाचकं सिद्धं सूक्ष्मे योगं न गच्छति॥ १३॥
परः परमं निर्वाणं यं प्राप्य न निर्वर्तते॥ १३॥
यथा प्रदीपः प्रतिबुद्ध्यं मानो जायत्यनेकः पुनरेक एव।
तथा हि मन्त्राः परिकल्प्य मानो जायत्यनेकः पुनरेक एव॥

Center for Shaiva Studies, Pondicherry Collection

53 B. यथा मणौ नैकविन्यस्य लोके जात्यन्तरं ह्येकमनेकरूपम्।
तथैव मन्त्रगणे च वेदितव्यं जात्यन्तरं ह्येकमनेकरूपम्॥
येनैव जायेतान्तं मणौ योगं प्रकल्पयेत्।
तदात्मकस्मृतास्तज्ज्ञा बहिःसहितविग्रहाः॥ 18
अन्य मा द्राविडं रूपं वृतं तस्यैव तादृशम्।
तादृशो ह्युपचारस्तु मन्त्रदेवानुरूपतः॥ 19
शास्त्रोपदिष्टमार्गेण यथा रूपं प्रकल्पयेत्।
तथा रूपो भवेन्मन्त्रस्ततः कर्म प्रसाधयेत्॥ 20
भीतिर्भावविशेषात्तु वर्णरूपं पृथग्विधम्।
सर्वो भाग्यानुरूपेण स्फटिको कोपलवद्यथा॥ 21
इति मन्त्रात्मकः पुरुषः प्रोक्तस्सर्वार्थसाधकः।
सर्वज्ञः सर्वगश्चैव सर्वरूपमयो हि सः॥ 22
परात्परतरं वक्ष्ये मन्त्रातीतं निरंजनम्।
निराभासं निराकारं वर्णरूपविवर्जितम्॥ 23
सर्वज्ञः सर्वगः शान्तस्सर्वात्मा सर्वतोमुखः।
अतीन्द्रियो निरालम्बः सुसूक्ष्मः शाश्वतोऽव्ययः। 24
सुनिष्कलो निरालम्बो नारायणो व्यापको ध्रुवः॥
निरौपम्यो ह्यप्रमेयश्च परात्मा प्रकीर्तितः। 25
यादृशेन तु भावेन पुरुषो भाव्यते यदा
तादृशो बहुधा चैव तथैव प्रतिपद्यते॥ 26

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

54A यत्नेन चिन्तये सूक्ष्मं सर्वपापानि नश्यते।

सर्वकामप्रदो ह्यात्मा प्रोक्तापवर्ग भेद विस्तरः॥

भूतात्मा ह्यन्तरात्मा च तत्त्वात्मा जीवसंज्ञितः।

मन्त्रात्मा परमात्माख्य एको पि बहुधा स्थितः॥

भूतात्मा भूतसंयोगात् तत्त्वात्मा तत्त्वसंस्थितः।

मन्त्रात्मा मन्त्रं योग्यो ह्यन्तरात्मा गिरा स्थितः॥

भोक्तात्, सुखदुःखानां प्रकृतिस्थो गुणान्वितः।

निर्मलो(स्व) भुवनेभ्यो मोक्षि मुक्तः परस्तु॰।? ॥

सर्वरूपं यथो इवर्णो नित्ययुक्तो ह्यवाप्नुयात्।

प्राप्तो शिव स्थितिं चापि पुनर्जीवनमाप्नुयात्॥

प्रायश्चेन परीक्षेण क्षीयात् पापजन्य कर्मणः।

तत्त्व विश्लेषण काले साद्वैतं प्रतिपद्यते॥

ज्ञानं ज्ञानपरो ह्यात्मा चित्तभेदात् स्वभावजा।

ज्ञानस्य बहु नामानि पृथग्भूतान्यनेकोटिभिः॥

(वी)
अनात्मरूपस्य कीर्तिते भ्रान्ति ज्ञानविमोहितः।

यथा निष्पद्यते ज्ञानं विमलं सर्वतो मुखम्॥

तदा मोक्षं परं धर्मं निःकृते शाश्वतं ध्रुवम्।

अहमेव परो ह्यात्मा पुरुषः कारणः स्मृतः॥

अहमेव परं ब्रह्म अहं ज्ञेय मनस्मरम्।

सर्वे विकारका भावा मत्त ज्ञान पृथग्विधाः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भावाभाव विनिर्मुक्तं अहमेव शिवोऽव्ययः।

(सं)

योगसंन्यस्तकर्मा यो ज्ञानसंछिन्नसंशयः॥

निर्विकल्पस्ततो नित्यं आत्मानं पर्युपासयेत्।

55 B निरस्य वासनाः सर्वा आत्मतृप्तो निरामयः॥

अद्वैतभावना युक्तः सदात्मानमुपासयेत्।

अप्राकृतेन दिव्येन निर्मलेन विकारिणा॥

व्यापकं नातिसूक्ष्मेण परेण योगचक्षुषा।

विशुद्धं शाश्वतं नित्यं ज्ञेयं नौपमम्॥

निर्विकल्पमचिन्त्यं च हेतुदृष्टान्तवर्जितम्।

कुत्रस्थं निर्गुणं शान्तं तत्वातीतं निरञ्जनम्॥

अविभाज्यमसन्देहं पश्यमीशानमात्मन... ।

सर्वगं सर्वदेहस्थं व्यापकं सर्वतो मुखम्॥

निराभासं निराधारं आत्मानं पश्यते शिवम्।

विभिन्नं प्राकृतं मार्गं मन्त्रतत्त्वपरावरम्।

मूर्तामूर्तं जगत्कृत्स्नं पश्यत्यात्मन्युपाश्रितम्॥

सर्वज्ञः सर्वदर्शी च परिपूर्णः सुनिर्मलः।

विमुक्तः केवलीभूत स्वरूप मक्षयमाप्नुयात्॥

इति सर्वज्ञानोत्तरे ज्ञानपादः समाप्तः॥ —००— ॥ * ॥

= * =

वृक्षाणां सारभूतं पुष्पं पुष्पं समुद्राणां क्षीरसागरम्।

तथा च सर्वशास्त्राणां सारभूतं शिवागमम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(वाङ्मय)

पदार्थानेकसम्पूर्ण सर्व वांमय साधनम् ॥१॥

अल्प ग्रन्थ महार्थेभ्यो तत्त्वप्रपुर्व यथा क्रमम् ।

योऽसावतीन्द्रियो ग्राह्य स्तत्त्वातीतो निरंजनः ॥२॥

सर्वज्ञः सर्व गश्शान्त स्सर्वात्मो सर्वतो मुखः ।

तस्मात्स्थास्त्र विनिष्क्रान्ते नाद रूपं निरामयम् ॥३॥

SS A अत्यन्त गगनसूक्ष्मं परमं सार्व कामिकम् ।

प्राविश्य बैन्दवं तत्त्वं बो कायित्वा च तं बिन्दुं ॥

पुनः सदाशिवात्प्राप्तं मनेदं सूक्ष्म लक्षणम् ।

ततः स्वराश्च वर्णाश्च हुंसवर्णा समुद्भवा ॥

पुनर्मन्त्राश्च शास्त्राणि छन्दो लक्षण संयुता ।

बभूव परमो नादो नादात्स्थब्दः प्रजायते ॥

शब्द मात्रा स्मृता मन्त्रा मन्त्रे मन्त्रा विदेवताः ।

दा
सर्वान् कामान् प्रयच्छन्ति सिद्धिना साधिता यथा ।

स्वर वर्ण समायोगात् दृश्या दृश्यं चराचरम् ।

तस्माद्विपासेयं वर्णान् स्वरसंयोग पूर्वकम् ॥

॥ इति श्री सर्वज्ञानोत्तरे मन्त्र तन्त्रोत्पत्ति प्रकरणम् ॥

वर्णयाग विधानं तु स्वरं संयोग पूर्वकम् ।

परमीकरणं चैव ब्रूहि तत्त्वेन शङ्कर ॥१॥

श्रृणुष्वैक मना भूत्वा वर्णयाग विधि क्रमम् ।

ककारादि क्षकारान्तं स्वर संयोग पूर्वकम् ॥२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्राकेन मन्त्रं भिन्नं स्वरैर्द्वादशभिस्तथा ।

ह्रस्वैः ~~[illegible]~~ जनासंख्याता दीर्घैरङ्गानि निर्दिशेत् ॥

सानुस्वारस्य योगात् त्रयो नेत्राः प्रकीर्तिताः ।

सविसर्गो स्मृता ह्यस्त्रा अनुस्वार विवर्जिताः ॥ ४ ॥

SS B हृद्बीजा अपरस्मिन्बीजो पञ्चबीजं नियोजयेत् ।

मात्रात्रयसमायुक्तं मूर्ध्नि बिन्दुप्र . . . जपेत् ॥ ५ ॥

शिवमेवं विधिं विद्या सर्ववर्णान्वनुक्रमात् ।

(व्ये)

ह्रस्वदीर्घप्लुता वर्णा ले यासां प्रकल्पयेत् ॥ ६ ॥

ह्रस्वस्यान्तयुतेन फट्कारेण तु मारयेत् ।

याधि क्रोधेन संयुक्तो जपेत्सैरक्तलोचनः ॥ ७ ॥

हूं का~~[illegible]~~रान्त संयुक्ता दीर्घाग्नि च्चाटयेद्ध्रुवम् ।

महांस्तु साधको भूत्वा साध्य मनं प्रकल्पयेत् ॥ ८ ॥

निर्गुणोदित मार्गेण प्रविशेत्तस्य तेजसे ।

तत्रस्थ ग्लानयो भूत्वा तेनैव सर्वथै स्तुतः ॥ ९ ॥

अङ्गान्यङ्गं च वन्धाय चिन्त चेतसि निक्षिपेत् ।

पञ्चकोशस्थितं तंतु संहरेद्धृदयेन तु ॥ १० ॥

यदेव कुरुते कर्म नदेवोपनवं स्मृतम् ।

जपेत्तद्भावना युक्तो नान्यं मन्त्रा हि दर्शितम् ॥ ॥

बिन्दुयुक्ताः स्मृता मन्त्रा प्रणवादि नियोजिताः ।

नमस्कारान्त संयुक्ता नार्चने संप्रयोजयेत् ॥ १२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

होमे स्वाहान्त संयुक्ता शान्तिकार्ये पौष्टिके ।

वश्ये च ॐ प्रयोक्तव्या स्वाहाकारान्त संयुताम् ॥ 13 ॥

किं वा मन्त्रविधानेनाति विस्तारेण ते ।

सर्वसाधारणं वक्ष्ये शृणु संक्षेपविस्तरम् ॥ 14 ॥

योविधिर्मन्त्रराजस्य प्रोच्यमानो भविष्यते ।

तमेव सर्वमन्त्राणां सततं परिकल्पयेत् ॥ 15 ॥

56 A तथैव सर्वदेवानां यजने संप्रयोजयेत् ।

॥इति श्री सर्वज्ञानोत्तरे क्रियापादे स्थूलवर्णमन्त्रोद्धार प्रकरणम् ॥

मन्त्रोद्धारं प्रवक्ष्यामि तत्वतः शृणु षण्मुख ।

अतिगुह्यं परं सूक्ष्मं सर्वमन्त्रमयस्य ते ॥

मातृकादौ स्थिता स्थिता या तु सर्पवेष्टा च कुण्डला ।

सा शक्तिः परमा सूक्ष्मा विश्वाख्या सदाशिका ।

पस स्थूद्व संज्ञाना प्रेरितानां तनिग्रहा ॥

कारणीयं करं यद्ध संवेष्यो राशि संस्थिता ॥ 3 ॥

सूचीधर्मा क्रियते या तु संतानेन महौजसा ।

संप्रदायेन सा तूर्णं मालानां मुच्यते स्फुटा ॥ 4 ॥

प्रमुक्ता जायतीयाते, करणीय करं यथा ।

प्रभा शाश्वति चामानां मोक्षद्वारं परापरम् ॥ 5 ॥

तत्र कुंभस्थ गन्तव्यं मध्यदेशं विपश्चिता ।

मध्यदेश मनुप्राप्य योजे तां चञ्चलां स्थिरीयम् ॥ 6 ॥

मूलमन्त्रं विदित्वा तु शक्तेर्मध्यं सुकुर्जयम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तन्मूलं जायते येन ओं धर्केस्सौ निगीयते ॥

संभूतिः सर्वबीजानां मुद्धार वशवर्तिनी ।

दीर्घौ सु नाशिको नादो स्थप्रमेयो ध्वनौ पनः ॥ ८ ॥

स्निग्ध प्रसन्न गम्भीर शाक्तुE ह्कारस्तु संस्मृतः ।

प्रासादवज्रु संयुक्तः पुनः बष्ठान्त योजितः ॥ ९ ॥

56 B अर्धेन्दु बिन्दु संयुक्तो मात्रा त्रय विभूषितः ।

स शिवः शाश्वतः प्रोक्तः सर्व ज्ञानोत्तरोत्तरः ॥ १० ॥

आद्यौ संविद्य मन्त्राद्यैः तस्यो ह्कारः प्रकीर्तितः ।

ह्रस्व स्वर समायोगा पञ्च ब्रह्माणि निर्दिशेत् ॥ ११ ॥

दीर्घैः भिन्न स्मृतो ह्यंगः कारणात्मा महास्तुतिः ।

(सुषुम्ना)?

मूर्धिन बिन्दु बकु स्थां गायत्रीं तां विनिर्दिशेत् ॥

स्वरादौ त्रीणि दीर्घाणि त्रितत्वं परिकीर्तितम् ॥

नेत्र त्रयं तु तज्ज्ञेयं क्रमशः सं प्रयोजयेत् ॥ १३ ॥

दक्षिणे ह्यात्मतत्वं तु विद्या तत्व मयोत्तरे ।

ललाटे शिवतत्वं तु त्रीणि पञ्चसु विन्यसेत् ॥ १४ ॥

मुखे षु नेत्र विन्यासो नेत्रं नेत्र क्रमेण तु ॥

विन्यसेदात्मनः पूर्वं शिवस्य च तथा पुनः ॥ १५ ॥

त्रयोदशान्त सं भिन्नं विद्येशानां प्रकल्पयेत् ।

गणेशानां तु गायत्रीं तावत् सांनिध्य मागताः ॥

हृदये लोकपालानां विज्ञेयं सार्वकामिकम् ।

अस्त्र पाशुपतं दीप्त स्तं मन्त्रं प्रकल्पयेत् ॥ १७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वे बिन्दुसमायुक्ता इच्छेत् कुन्देन्दुसंप्रभान् ।
विश्वकी द्विश्वनेत्रारो विश्वकृद्विश्वमूर्तयः ॥
ओंकारदीपिता मन्त्रा नमस्कारान्तयोजिताः ।
अस्त्रान्ते संप्रयोक्तव्या होमे स्वाहान्तसंयुताः ॥ १९ ॥
न बिन्दुर्न शिखा मात्रा यत्र वर्जितये नपुंसकम् ।
स विसर्गस्तथा दीप्ता घोरकर्मकरा स्मृताः ॥ २० ॥
एकत्रिंशान्तिकं वर्णं सप्तमस्वरयोजितम् ।
मकारार्धयुतं कृत्वा प्सारिकास्त्रं प्रकीर्तितम् ॥ २१ ॥
इति मन्त्राः शिखाः सूक्ष्माः परमाः सर्वकामिकाः ।
(च्छि)?
सर्वैरेभिः सदा कुर्या ~~पृष्ठ~~ वीकरण मानवः ॥ २२ ॥
यदा यदा समायोगे मन्त्रयोगे मदा तदा ।
कुपितकरकायेषु मात्रे मन्त्रार्थसिद्धये ॥ २३ ॥

॥ इति श्री सर्वज्ञानोत्तरे क्रियापादे प्रासाद मन्त्रोद्धार प्रकरणम् ॥

— x —

अथातः संप्रवक्ष्यामि शिवीकरणमुत्तमम् ।
यत्कृत्वा तु नरः सम्यक् शिवो भवति नान्यथा ॥ १ ॥
देहसंशोधयेत्पूर्वं धारणाभिस्तु पञ्चभिः ।
शुद्धदेहस्ततो भूत्वा शिवमन्त्रात् वियोजयेत् ॥ २ ॥
स्वाभिमान्तर्बहिः शक्तिं विन्यसेद्ध्यानरूपिणीम् ।
तस्य मध्ये तु हुंकारं ज्वलन्तं पावकप्रभम् ॥ ३ ॥
प्राणापानसमायुक्तो तालकं चित्ते निवेशयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऊर्ध्व टान्ते सत्र मोक्षस्तु हुंकारेण समान्वितः ॥४॥

गान्धि [struck] भेदं कुम्भकेवं पुनः सोध्यान मारभेत् ॥

(मूर्द्धं)?

सान्ते [struck] कृते सम्यक् गृह्णं वायुः प्रवर्तते ॥५॥

यो ध्मात इति विख्यातः सेवच्छया तु कनीयः .. ।

पूरकेणोच संहृत्य हृदयेन तु मन्त्रवित् ॥६॥

सान्तबीजमयं जीवं न्यसे धूंकार मूर्ध्नि ।

हुंकारस्य शिखान्तस्य कुलवं बीज विग्रहम् ॥७॥

57 B इयात्वा त्वेकाकिनं सूक्ष्मं बिन्दुभूतं निरामयम् ।

ततः संयोजये योगी शिवे परम कारणे ॥८॥

शिवातीते सदाशान्ते शुद्ध स्फटिक निर्मले ।

शक्ते नोद्धात मात्रेण शक्ते लक्ष्यस्तु मात्रितः ॥९॥

शक्तो भाव समायुक्तः प्रविशे छिद्रे व मध्यमम् ।

बीजवृत्यो शिखे सूक्ष्म तत्व प्र(?)यातु तत्ववित् ॥१०॥(द्वे)

... स्था[struck] दीनि विजानीया दीनि सानि निरोधयेत् ।

हृदा तु पार्थिवं बीजं वासवं शिरसा सह ॥ ११॥

नियुक्तं शिखया नेत्रं वायव्यं कव चान्वितम् ।

हूं कार मन्त्र संयुक्तं मण्डलेषु प्रयोजयेत् ॥१२॥

मात्रास्तु धारणा ज्ञेया ऊँ ज्ञाघा देशिकोत्तमैः ।

वैन्धवास्तु कला स्ताश्च निवृत्याद्याः प्रकीर्तिताः ॥

प्रथमं धारणा भेदेन प्रणवे त्वेकधा स्थिताः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्ञानवैतास्तु ललोलम्पक स्थूल सूक्ष्म विनिर्गताः ॥१४॥

ततो ध्यानं प्रकुर्वीत देह संशोधनाय च ।

चतुरस्रं समं पीतं वज्रांगं वज्राङ्कं कठिनं गुरुम् ॥१५॥

लकारासन मारूढं इन्द्रबीज मध्यतः स्थितम् ।

उद्घातैः पञ्चभिर्युक्तं वायु भूत विशोधयेत् ॥१६॥

अर्द्धचन्द्रं द्रवं सौम्यं शङ्ख कुन्देन्दु सन्निभम् ।

वारुणं मंडं ध्यायेत् मध्ये कमल भावितम् ॥

वकारा(रा-)सन मध्यस्थं शिरोबीज मयो मुखम् ।

युक्तं चतुर्भिरुद्घातैः वाह्नि भूतं विशोधयेत् ॥१८॥

58 A विबानल महावेग कालपाश विनाशनम् ।

वर्द्धन्तं तमग्निं ध्यायेत् नायनागं सुशीतलम् ॥१९॥

उडनी कुङ्कुम प्रख्यं मध्ये श्रृंगारकाङ्कितम् ।

ध्येयकारान्तर्गतस्तु सम्पन्न माग्नेयं मण्डलं स्मरेत् ॥२०॥

रकारासन मारूढं शिखारन्ध्र बीज मुत्तमम् ।

उद्घातैस्त्रिभिः संयुक्तं जल भूतं विशोधयेत् ॥२१॥

शोधयन्तं स्वकं देहं निर्दहन्त मकल्मषम् ।

सवर्णं क्लीं न्दु भूतं . . . . ॥२२॥

वायव्य मण्डलं ध्यायेत् पादादारभ्य चञ्चलम् ।

यकारासन संविष्टं कवचं वायुविग्रहम् ॥२३॥

शोधये पार्थिवं भूतं उद्घात द्वय योजितम् ।

ततः साञ्जनतये व्योमं समलं सर्वतो मुखम् ॥२४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नित्यं सर्वगतं शान्तं बिन्दुशक्तिविभूषितम्।
ओंकारसंविष्टं हकारं नादसंविदम् ॥25॥
कोणोद्यात मार्गेण स्मन्य भूतं विशोधयेत्।
मण्डलं बीजसंयुक्तं ध्यानेन विविधेन च ॥26॥
प्राणायामैर्जितं लग्नयक्ष धारणे योगिधीयते।
धारैव धारणा धार्य जगत्सर्वं हितन्मयम् ॥27॥
यदा स्वेच्छे योगीन्द्रा स्तत्त्वं कर्णजलं वायुः।
सर्वं संहृत्य देहस्थं मूर्तौ भूतो विधानवित् ॥28॥
ततो निरुध्य येन्मार्गं का नाडी वहते मम।
यस्मिन् चरति पुद्गलः . . . . . ॥29॥
तत्रान्तर्देह विनाश मन्तर्यं जनमेव च॥
58 B देहस्तस्य विदेहस्य साक्षिभूतस्य कर्मसु ॥30॥
नित्योदितस्य कुर्वीत सदा सन्निहितस्य तु।
वामनासापुटे यातु इडा सा परिकीर्तिता ॥31॥
दक्षिणे पिङ्गला ज्ञेया सुषुम्ना मध्यतः स्थिता।
यस्मिन्मध्ये स्थिता वायु सा नाडी सर्वकामदा ॥32॥
इडानाड्यां वहन्त्यां च दिवस्थान प्रकल्पयेत्।
पिङ्गला नाडि मध्ये तु सुषुम्ना मूर्ध्नि योगवित् ॥33॥
हृदये च विधानं तु नाभौ भौमं प्रकल्पयेत्।
~~मूर्ध्न मूर्ध्न~~ मूर्ध्नान्ते शिवं ध्यायेत् वरदं सर्वतोमुखम् ॥34॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रात्रौ संपूजयेद्देवं दिवा होमं च कारयेत्।

सन्ध्यासु च ततो ध्यानं दिवा रात्रौ जपः स्मृतम् ॥35॥

दिवा तु ~~xxx~~ तामसं कुर्यात् जपो रात्रौ तु राजसम्।

(त्वि)
सन्ध्यायां साक्षिकः प्रोक्तो जपः सर्वार्थसाधकः ॥36॥

(स्वान) रु
विस्पष्टं स्तनजलः प्रोक्तो राजसो पांसुरुच्यते।

मनसा सात्त्विकं विद्यात् जपं जप्यविदां विदुः ॥37॥

इधा
तामसं क्रूरकार्याणां वश्यादिषु च राजसम्।

सात्त्विकं दिव्यसिद्धीनां जपं कुर्याद्विचक्षणः ॥38॥

प्राणपात्र निरोधेन यो जपः क्रियते सदा।

स जपः सात्त्विकः प्रोक्तो भोग मोक्ष फल प्रदः ॥39॥

तं तु द्विविधं कुर्यात् स्थूलं सूक्ष्मं सदा बुधः।

ध्यानेन हि परं लिङ्गं प्राप्नुवन्ति हि योगिनः ॥40॥

स्थूलं मन्त्रमयं प्रोक्तं सर्वावयव संयुतम्।

59 A ~~त्रिमार्गावत~~ त्रिमार्गावधितं ध्यायेत् पूजायां होमवित्तमः ॥

केवलं शिवबीजं तु सर्वावयववर्जितम्।

न जातिरूपं पर सूक्ष्मं तत्सूक्ष्मं परिकीर्तितम् ॥42॥

दक्षिणायनमित्युक्तं निशा सोमात्मिका गृहे।

अहस्तु विमलं प्रोक्तं सौर-मेषो त्तरायणम्

सन्ध्या तु विषुवं प्रोक्तं कुत्तरेण . . . ॥43॥

उत्तरेणाहरित्येवं दक्षिणायनमादिशेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दक्षिणे नोत्तरं विद्यां मध्यमे तु त्रिशूलं भवेत्॥

सप्तीभूते यदा वायुः प्रसरेते संपुट द्वये।

त्रिशूलं तु विजानीयात् प्रणव मन्त्रो मयात्मकम् ॥५५॥

त्रिशूलं चन्द्र मध्ये ह्रीं सा दक्षिणायन नाडिकाः।

इडारन्ध्रान्तर्गतं ध्यायेत् पितृयान शिखिद्विज ॥५६॥

कह्ला वह्नी रवि वायु रुत्तरायण नाडिकाः।

श्रिं गलान्तर्गतं ध्याये देवयानं तदुच्यते ॥५७॥

अनन्ते शशि सूक्ष्मा सदाशिव शिवौ तथा।

सुषुम्नान्तर्गतं ध्याये त्रिशूले च विचक्षणः ॥५८॥

धर्मज्ञानं च वैराग्यं मैश्वर्यं चेति चतुष्टयम्।

योगपीठं च पद्मं च प्रणवेन तु विन्यसेत् ॥५९॥

तत्त्वं विन्यसेत् पूर्वं कर्णिकायां विचक्षणः।

व्यापयान्ते मूवा श्लोर्ध्वं पुनः शक्तिं नियोजयेत् ॥६०॥

ततश्चाकर्षये ज्जीवं शिवीभूतं निरामयम्।

पूरकेण शिखान्तस्थं शिवबीज मयं परम् ॥६१॥

(क्षे)?

५९ B स्थापयीत शिखामध्ये ज्योतीरूपं सुनिर्मलम्।

अमृतेनाप्लाव्य मानन्दुधारस्थात् सं ततः ॥६२॥

ततोऽस्य मन्त्रविन्यासं सूक्ष्मदेहस्य चापुरव।

यथा जानाति तत्त्वेन तच्छृणुष्व यथाक्रमम् ॥६३॥

शान्तौ करतलौ कृत्वा करशाखासु पञ्चसु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईशानादीनि ब्रह्माणि कनिष्ठादिषु योज योजयेत्॥

ततोऽङ्गानि नियुञ्जीत हृदयादि ततः पुनः।

प्रासादं विन्यसेत्पश्चा... पिण्डं सर्वतो मुखम्॥55॥

ततश्चालभनं कुर्यात्पादादारभ्य मूर्धनि...।

ईशानं पञ्चकं मूर्ध्नि वक्त्रे वक्त्रे स्तु पृष्ठे॥56॥

दीप्ततेजोज्ज्वलितो ज्ञानं पञ्चमं प्रणवेन तु।

हृदा यं गौ रघोरं तु गुह्ये वामं प्रकल्पयेत्॥57॥

पादादारभ्य सर्वाङ्गैः सद्योजातं तु विन्यसेत्।

हृदि ग्रीवा तु बाहौ च नाभ्यां च जठरे तथा॥58॥

पृष्ठे उरसि मन्त्रज्ञो विन्यसेत्तत्पुरुषं पदम्।

गुह्ये चैव तथा लिङ्गे ऊर्वोर्वै जानुनोस्तथा॥59॥

जङ्घयोश्च स्फिचोः कट्यां पार्श्वे वामं कला न्यसेत्।

पादयोर्हस्तयोश्चैव नासायां शिरसि तथा॥60॥

बाहोश्चैव च मन्त्रज्ञः सद्योजात कला न्यसेत्।

नेत्रं नेत्रेषु विन्यस्य पुनरङ्गानि योजयेत्॥61॥

(हृ) दयं हृदये विन्यस्य शिरः शिरसि विन्यसेत्।

शिखायां तु शिखा स्यात्तु कवचं स्तन मध्यतः॥62॥

60 A अस्त्रं हस्तप्रदेशे तु ततो ध्यानं समाश्रयेत्।

शिवस्य यादृशं रूपं तादृशं चिन्तयात्मनि॥63॥

शिव मन्त्रान्यास सिद्ध मात्मानं तु सदा कुरु॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्।

यथान्तर्देहविन्यासस्तथा बाह्येऽपि षण्मुख॥

बाह्ययागे यथा वह्नौ स्वधनदेहान्तरे तथा॥

तथा वै शिवयदेहे तु अग्नौ होमे तथैव च॥ 65॥

॥इति श्री सर्वज्ञानोत्तरे क्रियापादे परमीकरण प्रकरणम्॥

अतः परं प्रवक्ष्यामि बाह्ययागविधिक्रमम्।

सर्वकामप्रदं गुह्यं सर्वपापहरं परम्॥ 1॥

आलंकृत्य स्वकं देहं शिवमन्त्रैः यथाक्रमम्।

शिवीभूतः शुभूतात्मा शिवस्यार्चनमारभेत्॥ 2॥

उत्तराभिमुखो भूत्वाऽस्त्रमावर्तयेच्छुचिः।

विघ्नानुच्चाटयेत्स्थूलान् तालशब्दत्रयेण तु॥ 3॥

तर्जन्या तर्जयेत्तांस्तु हूं समन्त्रान् विन्यसेत्।

पुनरावेष्टयेन्मन्त्री सर्वान् कवचेन तु॥ 4॥

(दिशासु विदिशासु च?)

ततोऽस्त्राणि विन्यस्ये यति शासे विदिसासु च॥

वज्रं शक्तिं च दण्डं च खड्गं पाशं तथांकुशम्॥ 5॥

गदा त्रिशूलं चक्रं च पद्मं चेति यथाक्रमम्॥

ऐन्द्रीं दिशं समारभ्य यावदीशानगोचरम्॥ 6॥

अधश्चक्रं तु विन्यस्य पद्ममूर्ध्वं नियोजयेत्।

60 B गन्धैः पुष्पैस्तथा धूपैः पु(नै)दे रस्त्राणि पूजयेत्॥ 7॥

ततश्शक्तिमनहृत्य स्वधामामृतरूपिणीम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्यापयन्ति मूलश्चोर्ध्वं मध्यमेयो मनोपमात् ।
अर्घ्य पात्रं ततो गृह्य हुं फट्कारेण क्षालयेत् ॥
सबाह्याभ्यन्तरं पश्चात् कवचेनावकुण्ठयेत् ।९॥
बिन्दुस्थानं जनाकाल्ये मध्ये पद्मं विचिन्तयेत् ।
त्रितत्त्वं विन्यसेत्तासेन पुनः शक्तिं नियोजयेत् ॥१०॥
आपूर्य पञ्चभिर्ब्रह्मैः शिखाङ्गैश्च शिवेन च ।
गन्ध पुष्पसमायुक्तं तज्जलं मन्त्रसंस्कृतम् ॥ ११ ॥
आवाहयेत्परं देवं प्रासादं परमामृतम् ।
ऊर्ध्वं, रुद्रकुलं वल्लं शुद्धस्फटिकनिर्मलम् ॥१२॥
द्रव्याणि प्रोक्षयेत्तेन यज्ञार्थं कल्पितानि तु ।
अप्रोक्षितं न तान्दिव्यं भाविदय लंभे वै शिवे ॥१३॥
स्वमन्त्रैरर्चनं कुर्या देवतानां यथोदितम् ।
धर्मादि चास्त्र पर्यन्तं शिव वर्ज्य षडानन ॥१४॥
शिवस्य शिवमन्त्रैस्तु होमकाले विधीयते ।
सम्पूर्णाहुतिदाने च सर्वकर्म समर्पणे ॥१५॥
धर्मं ज्ञानं च वैराग्यं मैश्वर्यं च चतुष्टयम् ।
आग्नेयं दिशमाक्रम्य विदिक्षु प्रणवेन तु ॥१६॥
ब्रह्मस्थाने पुराशक्तिं कल्पयित्वा तु विन्यसेत् ॥
योगपीठं ततः पश्चाच्छक्ति नालं च पङ्कजम् ॥१७॥
अष्टपत्रं भवेत्तत्तु चतुर्मार्गान्त कर्णिकाम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्रिभागे केसराकीर्णं शक्तिजालवितानितम् ॥१८॥
वामा ज्येष्ठा च रौद्री च काली कला बला तथा।
बलप्रमथनी सर्वभूतदमनी मनोन्मनी ॥१९॥
आर्कपत्रात् समारभ्य यावत्तत्तु शांकरम्।
हृदयेन तु विन्यस्य केसरेषु दलेषु च ॥२०॥
मनोन्मनीं न्यसेन्मध्ये शक्तिं वै कारणात्मिकाम्।
ईशानं कार्णिकायां तु शिवव्योम प्रकल्पयेत् ॥२१॥
शिवस्य पुनरीशान्यां मूर्तिमन्त्रं प्रकल्पयेत्।
सित वर्णं निजं ध्यात्वा पूर्ववक्त्रे तु पुरुषम् ॥२२॥
याम्ये त्वघोर नामानं वाममुत्तरतो न्यसेत्।
सद्यः पश्चिम भागे तु ततो ह्यावाहनं भवेत् ॥२३॥
आवाह्य सद्यमन्त्रेण वामदेवेन स्थापयेत्।
अघोरेण तु सान्निध्ये मध्ये तत्पुरुषेण तु ॥२४॥
ततस्तु सकलं कुर्यादव्यक्त व्यक्त लक्षणम्॥
कदलीगर्भसंस्पर्शैः* स्वरागि सुरुज लक्षणैः ।

(लक्ष)

निम्नभजानु गुहल जितितम्ब विपुलोज्वलैः ॥१७१॥

प्रालम्ब जंघैः सरसैः पादैः प्रशस्तलक्षणान्वितैः ।

सुरक्त पाणिपादाब्जैः शंखचक्राम्बुजांकितैः ॥ १७२

स्फुलिंगैः नूपुर कुण्डल पर्वैस्तनु तुङ्ग नखलोज्वलैः ॥ ~~१७२~~ ॥

दिव्यज्वालक रवच सप रेखाभिर्लक्षणसंयुतैः ॥१७३॥

सेव्यन्ते तु विशेषाः सर्वदा कदम्बपीठिताः ।

दिव्यगन्धानुलिप्तांगैः दिव्याभरणभूषितैः ॥१७४॥

दिव्याम्बरधरैः सौम्यैः दिव्यमाल्योपशोभितैः ।

सदृश इन्द्रनिविलासाकारैः कालानलसमप्रभैः ॥१७५॥

78 A दिव्यज्ञानबलोपेतैः सृष्टिसंहारकारकैः ।

अघोरादीन् तु भावेदव्यक्तं सर्वैश्वर्यमयं शुभम् ॥१७६॥

सदाशिवं परं तत्त्वं शुद्धस्फटिकनिर्मलम् ।

योगपीठं परं शुद्धं तावन्मात्र विशाल महत्तमम् ॥१७७॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitized by Agamnigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वर्णादि चरणैर्युक्तं मध्ये कमल भूषितम्।

चारु केसर पर्यन्तं सहस्र दल विस्तरम्॥ 178॥

बहिरष्टाभिसंयुक्तं पङ्कजैर्विमलोत्तमैः।

विशुद्धशक्तिभिर्युक्तं वामाद्यैः सह शक्तिभिर्वृतम्॥ 179॥

विद्येश्वरैश्च पीठस्थैः सिद्धयोगिभिरावृतम्।

तत्रास्ते भगवान् देवो सर्वतत्त्वेश्वरो हरः॥ 180॥

सदाशिवो विभुर्व्यापी मन्त्रमूर्ति महः परः।

अनन्तकोटिसम्पन्नः अप्रमेय गुणाकरः॥ 181॥

अनन्त शक्तिसंभोग अनन्तानन्दसंस्थितः।

(स्व)
विभवस्य सुखैक देह मङ्गलापरमेश्वरः॥ 182॥

अनन्तादिशिखण्ड्यन्त स्थित शाश्वतेन चेतसा।

अतोर्ध्वं बैन्दवं तत्त्वं विमलं सर्वतो मुखम्॥ 183॥

परमं तत्त्वानामनन्तं ज्योतिरनामयम्।

तत्र बिन्दु स्थितं स्कन्द शुद्ध स्फटिक निर्मलः॥ 184॥

कदम्ब गोलकाकारं स्फुरत्किरण मालिनम्।

सकलो निष्कलश्चैव तथा सकल निष्कलः॥ 185॥

सूक्ष्मो भिन्नकलश्चैव शिवो ह्येषस्तु पञ्चधा।

कलौ शान्त्यादि निर्युक्ता सकलं परि पठ्यते॥ 186॥

78 B. निष्कलः केवलो बिन्दु व्यापी सकल निष्कलः।

ज्वालिन्यादिभिः संयुक्तः सूक्ष्मा सौ परिकीर्तितः॥ 187॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वरैः षोडशभिर्भिन्नैर्भिन्नो नो बिन्दुरुच्यते।

ततोऽस्यानन्ततो भेदः सर्वशास्त्रेषु कथ्यते ॥१८७॥

मन्त्रेषु मातृकायाश्च न विना बिन्दुना क्वचित्।

निष्कलस्तु पराशक्तिः सच्चिदा सर्वतोमुखी ॥१८८॥

सुसूक्ष्मा निर्मला नित्यानन्ता निर्वाणदायिनी।

या विभूर्भाति तत्त्वेषु सर्वतत्त्वेषु चैव हि ॥१८९॥

तथाभूतं जगत्सर्वमेकस्मान्नैकरूपया।

अचला अद्वैतं निरालम्बं निराधारं निरामयम् ॥१९०॥

अचलं व्यापकं शान्तं सृष्टिसंहारवर्जितम्।

मोक्षा रागत्वयो चैव हि ॥१९१॥

प्रकृतेः पुरुषसंयोगात् मायातत्त्व नत्वस्य संयोगात् ॥

कालो कालस्य संयोगात्

विद्यास्या शिवश्चैव बिन्दोः शक्तिसंयोगात् ॥१९२॥

सृष्टिरुत्पद्यते स्वच्छ बिन्दुशक्त्यादितः क्रमात्।

पृथिवी मादितः कृत्वा यावत्तत्त्वन्तु शैवकम् ॥१९३॥

तत्त्वात्तत्त्वं विजानीयात् दश मया .. ज्ञापितम्।

(ऊर्ध्वं)

ऊर्ध्वं तत्त्वादितः कृत्वा देवताश्च षडानन ॥१९४॥

अन्योन्यान्तरितैश्चैव प्रमाणान्तरितस्तथा।

यानि नामानि तत्त्वानां तानि तत्त्वानि षण्मुख ॥१९५॥

शास्त्रैश्च योजयेन्मन्त्री यावन्मन्त्रैः प्रमुच्यते ॥

ब्रह्माण्डादूर्ध्वतो ये तु सर्वतत्त्वव्यवस्थिताः ॥१९६॥

79 A जरामृत्युविनिर्मुक्ता बन्धा पञ्चवर्जिताः।

तेषां हि यातना कामात् न भयं विद्यते क्वचित् ॥१९७॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वर्ण्य सृष्टिं तु संहारं स्थितिं सर्वात्मिकां ऽप्यहं।

स्थितिकाले प्रभुंजन्ते यत्नैश्वर्यं यथोदितम् ॥१९८॥

संहारे त्रिगुणाभूत्वा तत्वैः सार्द्धं विशंति ते।

सृष्टिकाले प्रजायन्ते सर्वतत्वैः स्वकैः क्रमात् ॥१९९॥

पुनरन्येव येतेवां उदयास्तमनं स्थितिः।

यो यावन्मात्रिको नित्यं तत्वतस्तद्विजानवित् ॥२००॥

(यी)
तत्काल स्थायी सोऽपि जायते तत्परायणः॥

यथान्तराणि प्रोक्तानि प्राणावर्ते श्वसन्ति तु ॥२०१॥

तथान्तराणि विज्ञानि उदयास्तमनादिषु।

नोदयास्तमनं स्कन्द जायते शिववेदिनः ॥२०२॥

(नां)
यतो हि सर्वतत्वानां विज्ञानादन्ततः स्थिताः।

(धा)
तत्वैरेभि र्निबन्धानो सर्वदुःखेन संयुतः ॥२०३॥

(वि)(र्ज्ज)
नान्येन शाम्यते प्रान्तः पूर्ज दीक्षा शिवात्मिका ॥२०४॥

॥श्री श्री इति श्रीमत्सर्वज्ञानोत्तरे क्रियापादे ऽध्वप्रकरणम् ॥

—x—

अतः परं प्रवक्ष्यामि अग्निकुण्डस्य शोधनः।

सर्वतत्व निबन्धाय सर्व कार्य प्रदाय तु ॥१॥

पशुः कार्य नियुक्तात्मा नादि मल प्रमुक्तिनः।

शृणु वत्स परां दीक्षां शिवसायुज्यदां शुभाम् ॥२॥

यस्य यस्य हि देवस्यापि मन्त्रो येश्वरः।

अकाराकारसंज्ञितं वह्निबीजं प्रकीर्तितः ॥३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

79 B वायुबीजस्तु संयुक्तं अघ बन्धं नियोजितः।

मूर्ध्नि बिन्दु समायुक्तः मन्त्रोऽसर्वेषु कीर्तितम् ॥४॥

तदेकमक्षरं शिवं मात्रा द्वादशाभिः पुनः।

कृत्वा वह्निजकारस्यान्ता दीर्घैः षड्भाभिर्निर्दिशेत् ॥५॥

नेत्रत्वं बिन्दु संयुक्तं त्रयो नेत्राः प्रकीर्तिताः।

सद्योजातस्मृताः ह्रस्वा बिन्दु नाद विवर्जिताः ॥६॥

शिवो नेन विधानेन इच्छा देवानु क्रमात्।

तर्पयेद्वा यथाभ्यस्ततो दिशां समारभेत् ॥७॥

(उक्तो) शिवो शितो इच्छा-ज्ञातो नामान्ते निर्धौत नालकः।

धौत नादास्तु संसिक्ता रितया मार्जित प्रवेशयेत् ॥८॥

आलभ्य जलाभिः कृत्वा शिवाङ्गैः प्रणवेन वा।

नेत्रं नेत्रेषु विन्यस्य नेत्रबन्धं तु कारयेत् ॥९॥

कुकूल पदृवर्णाङ्गैः स्तथा कार्पास जेन वा।

सन्तेशेन नवनाथ सितेन लवण वा लसा ॥१०॥

पुष्पांजलि समायुक्ता दक्षिणा मूर्ति मानयेत्।

गुरोः संसिक्त मनसा दर्भहस्तः समाहितः ॥११॥

दर्भाग्रेर्दक्षिणा जानु स्पृशन्तौ दोर्भि कल्पयेत् ॥

ततश्चालं बनं कृत्वा पाशात् संहत्य होमयेत् ॥१२॥

हृदयेन विधानज्ञ स्तथैवास्त्र हृदयेन तु।

वर्णान् वीतं यकारं तं प्रासादं च पुनः क्रमात् ॥१३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्वोक्तं बीजितान् कृत्वा धर्माधर्मौ नियोजयेत्।

धर्मं तु संस्थितौ ज्योत्स्नाख्या या धर्मं ततो न्यसेत्॥१५॥

४० A उभयोः संस्थिता रौद्री तत्रस्थौ होमयेद्द्रुतौ।

त्रितत्त्वे शोधिता वर्णा शक्तित्रयविहो न्यसेत्॥१६॥

वर्णातीतधर्मं तु धर्मो मध्यममेव तु।

धर्माधर्मौ प्रसादेन व्यापिकौ होमयेत्पुनः॥१७॥

अथवा तावुभौ स्कन्द धर्माधर्मौ विनिश्चितौ।

होमयोः षष्ठिवत्तत्त्वेन सकलेन विचक्षणः॥१८॥

अकारौकार संभिन्नं हंसं वर्णान्तसंस्थितम्।

मकारसहितं देवं वह्निवायुसमीरितम्॥१९॥

नादेन बिन्दुना युक्तं मत वा ॐ नियोजितः।

सकलं सर्वभूतस्थं शिवतत्त्वं प्रकीर्तितम्॥२०॥

यावन्तत्त्वे प्रकुर्यास्तु शिवतत्र प्रकल्पयेत्।

तन्मन्त्रैस्सर्व संस्कार स्तावन्तस्तत्त्वे समाचरेत्॥२१॥

जातिधर्मैः समस्तैस्तु जरा धर्मो निराकृतः।

जाति धर्मांश्च वै धर्मे स्म स्कन्द तानि तु॥२२॥

स्थाने जनन तयेश्वर्यं तद्भोगाधातनं तथा।

आद्योङ्कारं लयं चैव होमयेत् क्रमशः पुनः॥२३॥

तत्त्वं संयोजयेत्पूर्वं कुण्ड मध्ये विधानवित्।

स्वनाम सर्वतत्त्वानां मन्त्रो ग्रहण कर्मणि॥२४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्वमध्ये तु गायत्रीं ध्यानमन्त्र विधिकल्पितान्।

पशुसंगृह्य तत्वञ्च तस्य गर्भे नियोजयेत् ॥ 25 ॥

नासाग्रे नियतस्थानं पशोर्गृह्य कर्मणि।

हुल्लको ..... तेजपिण्डाकृतिं स्मरेत् ॥ 26 ॥

40 B ताडयेच्चास्त्रबीजेन हृदयेन समुद्ध्य।

गर्भाधानं तु सद्येन वामु पुंसवने स्मृतम् ॥ 27 ॥

सुम .... नोसंज्ञेन पुरुषं जातकर्मणि ॥

ईशानं योजयेन्नाम्नि हृदयस्त्वन्नप्राशने ॥ 28 ॥

शिरसा चौडकारस्तु शिखाया भोगमेव च।

(ङौ)
अधिश्वर्यं नेत्रबीजेन कवचेन लयं हुनेत् ॥ 29 ॥

एकैकेन दशाहुत्यो पूर्णाहुत्यं शिवेन तु।

दशाजीः स्तोतलं शुद्धिं ब्रह्माङ्गैः स्तुभूर्वशः ॥ 30 ॥

शिवेन सर्वतत्वेषु तत्वशुद्धिं समाचरेत्।

पाशच्छेदं तथा दाहं प्रायश्चित्तं च होमयेत् ॥ 31 ॥

तत्वं तत्वेषु संन्धाय तत्कांश्च विशोधयेत् ॥

हुं फट् कारेत् ॥ 32 ॥

वियोजयेज्येद्य पश्चा ह्रौं ह्रां ह्रौंव चोदयेत्।

तत्वे तत्वे त्रिदं कर्म विधिना नेवसम्पुटम् ॥ 33 ॥

कर्म श्रौतस्त्रिविस्तारं श्लोके तु समाचरेत्।

कालाग्निरुद्रतत्वेतु कालाग्नितत्वं विशोधयेत् ॥ 34 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नारके नारकात् घोरात् जुहुत्वा कूश्माण्डतां नयेत्।

पाताळे सप्तमे तं तु ध्यात्वा कृत्वा निमोचयेत् ॥३५

अथोर्ध्वे हाटके तत्वे भूलोके जनयेत्ततः।

स्थावरत्वं तु सद्येन सारिसृप्य मेवातेन ॥३६॥

पक्षित्वं घोररूपेण मृगत्वं पुरुषेण तु ॥

पशुत्वं मीश बीजेन होमयेदनुपूर्वशः ॥३७॥

शाकैः दशाजि मन्त्री हुत्वा पूर्णाहुतिं ततः।

४१ A सद्येन वामदेवेन हृदिना च विधानवित् ॥३८॥

इमत्वं होमयेद्देही वैश्यादीननुपूर्वशः।

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ॥३९॥

उपानिष्क्रमणं नामान्न प्राशनमेव च।

(कर्ण)
हृदिना निष्क्रमं कार्यो चूडा वै ब्रह्माणिः स्मृता ॥४०॥

अथोपनयनं कार्यं ब्रह्माङ्गे ईशाजेः क्रमात्।

मेखलोपवीतं च दण्डं कृष्णाजिनं तथा ॥४१॥

(नयो)
स्वाध्याय मङ्गकार्येश्लो सैष्यो पालनमेव च।

जिह्वा विवाहनं मौनं ब्रह्मचर्यं शमो दमः ॥४२॥

गुरुवासदनं जाप्यं मनिन्द्रा मस्तु हार्जवः।

(ति)
अहिंसा सत्यमद्रोह स्त्यागः क्षान्तिरचैशुनः ॥४३॥

दयाभूतेष्व लोलुत्वं मार्दवं ह्रीरचापलम्।

(इङ्गि)
तेजः क्षमा धृतिः शौच मद्रो . . . . [illegible] नता ॥४४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वान्नवकर्मणैतान् गायत्र्या दशधा हुनेत् ।

त्रायुषं चोपाकर्म गोदानं च महाव्रतम् ॥ ४५ ॥

नैष्ठिकं चासिधारं च हुनेत्षोडश पतेन तु ।

तत स्नात्वा प्लावनं कृत्वा शिखाङ्गैरजितोमते ॥ ४६ ॥

पत्नीसंयोजनं कुर्यात् ब्रह्माङ्गैः पुनरेव हि ।

कृत्वा दर्भमयीं पत्नीं तामित्येव नियोजयेत् ॥ ४७ ॥

शौक्लकैर्दशशाखि मन्त्रो शौक्लकेनाहुती दश ।

कथ शी
अग्निष्टोमो ऽत्यग्निष्टोमो वाजपेयोऽद्य षोडशी ॥ ४८ ॥

81 B अतिरात्रोऽप्तोर्यामश्च सोमसंस्था इति स्मृताः ।

व
ब्रह्माङ्गैः शिवगायत्र्या महास्त्रेण शिवेन च ॥ ४९ ॥

विंशाहुतीर्दस्यात् शौक्लकस्य विशुद्धये ॥

पूर्णाहुतिं ततः पश्चात् सर्वसंस्कारकर्मसु ॥ ५० ॥

शिवेन संप्रयुञ्जीत प्लुतेनामृतवर्ष्मणा ।

शिवेन कुरुते होमं यावत् संस्कारकर्मणि ॥ ५१ ॥

वर्जं पूर्णाहुतीमन्त्रं द्विगुणं तत्समाचरेत् ।

सोमसंस्थावसाने तु सर्वमन्त्रैः सकृत् सकृत् ॥ ५२ ॥

सोमपानाहुतिं दद्यात् दधि क्षीरं घृतं मधु ।

(क्तो)
सहस्रक्रतु मध्ये तु दश दद्यात् परं हुनेत् ॥ ५३ ॥

त्रिंशत्त्रिंशतिराहुत्यो शिवेन च विचक्षणः ।

(र्णां)
अवभृतं ततो होमे दशाहुत्ये पञ्चविंशतिः ॥ ५४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवमन्त्रेण मन्त्रज्ञो . . . स्थापनाति कल्पवान्।

वाम प्रस्थ ततो कृत्वा सर्वमन्त्रैश्च पञ्चधा॥ ५५॥

ताडनात् सर्वपरित्यागं कृत्वा . . . . . यते॥

त्रिसूत्रं होमयेत् तस्य सर्वमन्त्रैः सकृत् सकृत्॥ ५६॥

विरुद्धं कालमव श्रेयो कुम्भ लोके नियोजयेत्।

सन्धानं पूर्ववत्कृत्वा शोधयित्वा ततः पुनः॥ ५७॥

(रमेत्)

इष्ट्वा तु पूर्ववद्देवान् पूर्वोक्त विधिमाचरेत्।

कर्तृत्वं वासुदेवत्वं रुद्रत्वं च विज्ञानवित्॥ ५८॥

पूर्ववत्कर्म योगेन होमयेत् सुसमाहितः।

कटाहं पूर्ववत्कृत्वा दण्डरुद्रादिगीश्वरात्॥ ५९॥

82 A पूर्वोक्तेन विधानेन यजेत् ब्रह्मा च मूर्धानि।

. . . . . महेशं पूर्ववत् न्यसेत्॥ ६०॥

आदित्यरुद्र स्वकं देशे कालं याम्ये नियोजयेत्।

मायानं तु नैर्ऋत्यां वारुण्यां तु महाबलम्॥ ६१॥

(र्णौ)

वायव्यां शोभणं येन कामरूपं ततोत्तरे।

सर्वविद्याधिपं रुद्रमैशान्यां तु नियोजयेत्॥ ६२॥

स्वमन्त्रैः रत्नपल्लवान् शिववच्च तु महेश्वरम्।

पूर्वोक्तेन विधानेन कृत्वा मण्डलतर्पणम्॥ ६३॥

ततस्तु शंभुरुद्रत्वं भावयित्वा विशोधयेत्।

शेषेषु निष्कृतिं दद्यात् विंश विंश हुतिक्रमात्॥ ६४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विशोध्या पार्थिवं (तं) तत्वं तस्मिंल्लीने नियोजयेत्।
तेजो निले तथा … लीने अहं क्रीडि भणे गुणे ॥६५
प्राकृते पौरुषे चैव रागविद्याकले तथा।
काले मायां पुनश्चैति विद्यायामीश्वरे तथा ॥६६॥
सदाशिवे तथा तत्वे तथा सकल निष्कले।
सर्वतत्वाधिपान्मान्ते तत्ववर्णा (स्त) स्थाप्य परात् ॥६७॥
विधिना तेन संशोध्य कारणे चोन्मने न्यसेत्।
अथा सर्वतत्वेषु यजेदेकं परं शिवम् ॥६८॥
तन्मन्त्रैः सर्वसंस्कारा स्तत्वे तत्वे समाचरेत्।
तस्यैव दीक्षणा मूर्तौ क्रमात्तत्वाधिपान् न्यसेत् ॥६९॥
तं महेश विष्णुरुद्रास्ता पद्मचैव नियोजयेत् ॥
42 B पूर्ववत्सर्वकर्माणि सर्वाध्वानि समाचरेत् ॥७०॥
तथैव चोन्मनीभाव माहुर्यन्ते षडानन।
सनारेव निधिः प्रोक्ताः शरीरं शृणु सांप्रतम् ॥७१॥
येनेशुद्धेन शुद्धस्तु जायतेह न संशयः।
पूर्वोक्तेन विधानेन धारणाभिस्तु पञ्चभिः ॥७२॥
शोधयेत्सर्वतत्वानि देहस्थानि पुनर्पुमान्।
पश्चात् संयोजयेत्पूर्वं पूर्वोक्त विधिना शिवे ॥७३॥
साधकानां शिवातीते शुद्धस्फटिक निर्मले।
कर्म न्येव कृते तस्य शिवांशो पो विमुच्यते ॥७४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सप्ताभिमन्त्रितां कृत्वा क्षुरिकास्त्रेण कर्तरीम्।
योजयेद्धोतृ शिखास्थाने युक्तां त्रिमधुरेण तु ॥ 75
शिखाबीजेन मन्त्रज्ञो वौषडन्तेन निक्षिपेत्।
शक्तिसम्पुटमध्यस्थं कारणेन नियोजयेत् ॥ 76 ॥
(पश्चा)
अनन्तरं ततः पंचात् साधिकाराद्विमोचयेत्।
यमुद्दिश्य कृतं कर्म मन्त्रदैवतपूर्वकः ॥ 77 ॥
विज्ञानशास्त्रदृष्टेन तत्तस्य फलदं ध्रुवम्।
यत्कृतः ज्ञानचारेण विधिहीनं षडानन ॥ 78 ॥
न तेन कर्मणा सिद्धिं न स्वर्गं न परां गतिम् ॥ 79 ॥

॥ इति सर्वज्ञानोत्तरे क्रियापादे दीक्षा प्रकरणम् ॥

— * —

(नि)
अत ऊर्ध्वं प्रवक्ष्ये दीक्षाविधि तितिक्षलक्षणम्।
चातुर्वर्ण्यहितार्थाय परमेशेन भाषितः ॥ 1 ॥
संहृत्य सर्वतत्त्वानि पञ्चधा परिवर्तयेत्।
83 A दैवताश्च ततो ज्ञेयास्तेषु मन्त्रान् यथाक्रमम् ॥ 2 ॥
पृथ्व्यापस्तथा तेजो वायुराकाश पञ्चमः।
जातानि पञ्चतत्त्वानि सर्वदा व्यापकानि तु ॥ 3 ॥
न विना पञ्चभिस्तत्त्वैर्देहबन्धो विधीयते।
स्थूलसूक्ष्मविभागेन ज्ञात्वैतानि विशोधयेत् ॥ 4 ॥
सर्वतत्त्वानि शुद्धानि विशुद्धैः षडानन।
दैवैश्च देवतास्सर्वे शुद्धाः सूक्ष्माः भवन्ति हि ॥ 5 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ब्रह्मा विष्णुश्च रुद्रश्चानन्तेशः सदाशिवौ ।

पृथिव्यादिषु तत्त्वेषु क्रमात्तत्त्वाधिपाः स्मृताः ॥६॥

तेषां मध्यमन्त्रस्तु विज्ञेता मन्त्रयाजवत् ।

तथास्त्रिं शान्तिमे शम्भो इतरेषां जननात्मकम् ॥७॥

पूर्वं विश्व जनं कृत्वा तस्या योनिं प्रकल्पयेत् ।

एतद्वर्णं च तस्या गुणैः पञ्चदंष्ट्रो जनं तथा ॥८॥

निवृत्तिं मन्त्रेण साधये साधकोत्तमः ।

गुह्यकेन प्रतिष्ठां तु विद्या घोरेण होमयेत् ॥९॥

(तु)
शान्तिं तत्र पुरुषेणैव शान्त्यतीतां शिवेन तु ।

दीक्षाकाले शतं ज्ञेय माहुतीनां तु साधकैः ॥१०॥

(तैः) हुते श्चैव तु कुर्यान्ते पशूनां जन्मबन्धनात् ।

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ॥११॥

जन्म निष्क्रमणं नाम अन्नप्राशनमेव च ।

अधिकारं तथा भोगं लयं चैव विधानवित् ॥१२॥

४३ B ततश्च स्त्रोतसं शुद्धिं तत्त्वसंशुद्धिमेव च ।

वियोगश्च तथोद्धारं तत्त्वसन्धानमेव च ॥१३॥

छेदं भेदनं दाहमेतान् पूर्ववदाचरेत् ।

पृथिव्यादिषु तत्त्वेषु ततः कुर्यान्निरंजनम् ॥१४॥

पूर्ववद्दहनं विलक्षाद् शोधयित्वा शिवं नयेत् ।

पुनरेवं प्रवक्ष्यामि गुह्याद्गुह्यतरं परम् ॥१५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संस्कार रहितः कर्मा जित्वा केवल योजनः।
इष्ट्वा देवं शिवं शाश्वतं प्रासाद मानितौ जलः ॥16
सहस्राहुतिहोमं तु ब्रह्माङ्गैः पुनराचरेत्।
भूयो मूल सहस्रं तु दत्वा देवस्य अण्डुरन ॥17॥
संहृत्य पुत्रकं पश्चात् शिवा तेन नियोजयेत्।
ततः सन्धाय तत्वानि पुनर्मूलेन जोदयेत् ॥18॥
ततस्तेनैव मार्गेण विद्युतत्वे नियोजयेत्।
आमलकं यथा पूर्वं मास तत्वं जडानन ॥19॥
कृत्वा तु देह संश्लिष्टात् पुनस्तत्वं नियोजयेत्।
पूर्वोक्तेन विधानेन योजयित्वा परं शिवम् ॥20॥
तथा चैव शिवाश्लेषं कृत्वा कुर्याद्दनामयम्।
पूर्णं दीक्षा लताद्ना याग मण्डेश्वरस्य तु ॥21॥
कृत्वा पूर्वं गुरोर्यागं अपरेऽहनि पुत्रकः ॥22
गुरुरत्याणि संस्कृत्या विसर्जयेद्विधानतः ॥~~22~~॥
शिवादीनां विसर्जनार्थं गुरुः पंक्ति पुनर्व्रजेत् ॥23
85 A शास्त्रोपदिष्टमार्गेण वारुण्या माहेश्वरस्य तु।
पञ्च संख्यान्यजेन्मन्त्री मण्डले हृष्टमानसात् ॥24॥
सदाशिवमनन्तं च विद्यारुद्र सहोमया।
विष्णुं देवेशं ब्रह्माणं स्कन्दमेव च ॥25॥
संपूजयेत् पुत्रकः पश्चात् पूजयेच्छम्भुं तथा गुरुः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(स्त्रा)
गन्धो पुष्पस्रजो भिन्ना द्रव्यै र्वस्त्रा लंकार वाहनैः ॥26॥

पूजयित्वा विधानेन तथा ऽन्नानि निवेदयेत्।

ततो निवेदिता ऽन्नो तु गुरु पार्श्वे विनुश्चयेत् ॥27॥

अद्य प्रभृति भगवन्नो विदेहो ममान्तिकः।

(वम)
कुकृं यो यो विकल्पेन शंकरो लयइत्ययं तेनवा॥
(सन्तुष्टो यावदा कुलः)

ततो गुरुवशो भूत्वा संतिष्ठो सापि याकुलः।

अनुज्ञातो यथा तेन कुर्या त्कार्याणि सुव्रतः ॥29॥

अग्निकार्यं जपं पूजा दीक्षा ज्ञान व्रतानि च।

वृथा तेषां विजानीयात् गुरुर्येषां न देवता ॥30॥

गुरुः पिता गुरुर्माता गुरुर्देवो गुरुः स्मृतः।

गुरोरस्तु न परं किञ्चि दित्याह ~~भ~~ भगवान् शिवः ॥31॥

ज्ञाना ज्ञानेन दिव्येन चोद्धाटयति चक्षुषी।

अज्ञानतिमिरा क्रान्ते तस्मा ज्ज्ञान मयो हि सः ॥32॥

सिद्ध विद्याधरान् भोगान् सदेवासुर मानुषान्।

प्राप्नुवन्ति समायुक्ता गुरुणो त्तेन कर्मणा ॥33॥

45 B गुरुरग दिक्ष मार्गेण प्राप्नुवन्ति परं पदम्।

तस्मादादौ गुरुः प्रोक्तः पश्चाद्देवो निरंजनः ॥34॥

दीक्षया तु परं ज्ञानं लभते शाश्वतं यतः।

तस्मान्नास्तत्र बोद्धव्यः गुरुरन्यः परतो गुरुः ॥35॥

गुरव स्तोषिता येना हं रुद्र गणैः सह।

तोषिता नात्र सन्देह स्तथा देवाः सवासवाः ॥36॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथ ज्ञानेन कृत्स्नेन नरके पतनं ध्रुवम्।

तस्मादेवं विदित्वा तु गुरुं नैवावमानयेत् ॥४७॥

आसनं शयनं यानं नारोहेद्गुरुसन्निधौ ॥४८॥
(नाद्यापानं प्रकुर्वीत)
गुरोर्निम्नासनो भूत्वा सन्तिष्ठेत् तत्परायणः।

छत्रं नैवाग्रतो धार्यं व्यजनं वीजने च पादुके ॥४९॥

किरीटं कुण्डलं छत्रं चैवं न कुर्याद्गुरुसन्निधौ।

नाद्यापानं प्रकुर्वीत व्याख्यानं शिष्यसंग्रहम् ॥५०॥

गुरोश्चैव समीपस्थो गुरुशिष्यप्रबोधनम्।

(नो)
न श्रोतव्या गुरोर्निन्दा शास्त्रनिन्दा तथैव च ॥५१॥

देवस्य देशिकानां च मुनीनां च पदानि च।

गुरोः पत्नीं च कारिकां वा ज्ञातरं न व्यतिक्रमेत् ॥५२॥

तथा चैवानतो ज्येष्ठान् सर्वान् पश्येद्गुरूनिव।

दीक्षाभिषेकज्येष्ठेन नातिभूय कदाचन ॥५३॥

तपोविद्याधिकस्यापि तस्य नाति प्रपादनम्।

(तो) (वो)
सर्वते गुरवो ज्ञेया ये चान्ये पूर्वदीक्षिताः ॥५४॥

मान्याः पूज्याश्च ते नित्यं गुरवो धर्ममानुषैः ॥५५॥

(तत्त्व)?
॥ इति श्री सर्वज्ञानोत्तरे क्रियापादे कालवत् पञ्चतत्त्वदीक्षाप्र:
करणम् ॥

न प्राप्नोति परां दीक्षां गुरुभक्तोऽपि यत्नतः।

कालेनानन्तदीक्षितो यस्य तस्य मोक्षः कथं भवेत् ॥

किं प्रदातस्य संक्लेशो मोक्षभ्रान्तिद्वयं कृतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

किं किंचिद्विद्यते कार्यं तस्य वा मोक्षसाधनम् ॥२॥

गुरुजनाय शान्ताय सत्याचाराय सुव्रत ।

मृतस्यापि नरं स्कन्द दीक्षा कार्यं विधीयते ॥३॥

- - - - - - - - विधिवत्संक्षेपविस्तरम् ।

अपि कालप्राप्ते कुर्यात् येक श्रितलमा हितः ॥४॥

तत्त्वानि देवता बीजं कालिकैः कारवीरकैः ।

उद्धार्थ विन्यसेन्मन्त्री दर्भ पुत्रौ शकैकृते ॥५॥

स्नापयित्वास्त्रबीजेन पञ्चगव्य शिवाम्बुना ।

संस्थाप्य दक्षिणे पार्श्वे तस्य नाम हृदि न्यसेत् ॥६॥

अथ नाग्येन संस्थाने गोमयेन जडात्मना ।

(न्ये)?

समन्त्री पञ्चगव्येन कृत्वा तासित् नियोजयेत् ॥

शक्तित्रय स्थिते तासु धर्माधर्मे च जन्तुरव ।

तदेव लम्बकं कृत्वा तन्नालं हृदये होमयेत् ॥८॥

(तु)

तत स्थु मूर्ध्नि आज्ञाख्ये यावल्लोहितलान्तकः ।

विन्यसेत्सर्व तत्त्वानि तत्त्वदैवानि तु क्रमात् ॥९॥

88 B बिन्दुतत्त्वे न्यसेन्मूर्ध्नि तत्र बिन्दु नियोजयेत् ।

शान्तिं च निष्कले स्थाने दयात्वा सर्वाङ्गिकामु~~स्वात्~~ स्वात् ॥

मूर्ध्नि लो खण्डिकोर्ध्वं तु न्यसेद्धवं सदाशिवम् ।

तत्रास्त भस्य संलीन विन्यसेच्छान्ति मण्डलम् ॥११॥

जिह्वायां वक्त्रमध्ये तु तत्र विद्यां नियोजयेत् ।

अंशौ विद्येश्वरान् मन्त्री ग्रीवायां बाहुसंधिषु ॥१२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मायां वै वाम पार्श्वे तु न्यसेत्कालं तु दक्षिणे ।

कालो पुरालिलं स्थाप्य हृदये नील लोहितम् ॥ १३ ॥

तत्रापरं पुनर्विद्यां तत्रैव पुरुष: स्मृत: ।

रागो पिरञ्जकस्तस्य विश प्रबोध लक्षणौ: ॥ १४ ॥

अव्यक्ता पुदरे ह्यात्वा नाभौ स्कन्धाणि विन्यसेत् ।

(श)
विबद स्पर्शौ च रूपञ्च रसो गन्धश्च पञ्चम: ।

(वृ)
वृत्तं वंशो गुणं न्यस्य तत्रैव पुरुषत्रयम् ॥

नाभी मेढ्रान्तरे बुद्धि मह कृति श्च लाव्येषु ॥ १६ ॥

यो येषु व्योमेश्वरं देवं व्योम मध्ये नियोजयेत् ।

तत्रैव योजयेत् प्राज्ञ गुह्या गुह्यात्मकां स्मृतम् ॥ १७ ॥

यो ने भ्यन्तरत: स्कन्दे वित्तस्थाने हुताशनम् ।

तस्या को वारुणं तत्वं यावद्यो जानुमण्डल: ॥ १८ ॥

तस्यो भ्यन्तरे लोकान् यावदा गुल्फ कीलकौ ।

लोकादौ विन्यसे देवान् ब्रह्म विष्णु महेश्वरात् ॥ १९ ॥

गुल्फाये पो · · पृंते तु किञ्चि स्वभ्यन्तरे गुह ।

चिन्तयेत्सप्त पाताल नरकांस्तु तल स्थितौ ॥ २० ॥

पादाङ्गुष्ठे तु देवेशं कालाग्नि पतिमीश्वरम् ।

86 A स्थापयित्वा विधानेन पुनरभ्यर्चयेत् क्रमात् ॥ २१ ॥

संचिन्त्य संहिता येद्वा मूर्ध्नि आरभ्य मन्त्रवित् ।

पादादारभ्य तान् सर्वं · · ओं लौ संस्थाप्य शोधयेत् ॥ २२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यागं यथोचितं कृत्वा तत्त्वे योनिमनुक्रमात् ।

कलयोजित्वा यथापूर्वं पश्चात् सं हृदये योजयेत् ॥23॥

गर्भाधानादितः कृत्वा सर्वकर्माणि पूर्ववत् ।

... तत्त्वात्तु सर्वतत्त्वेषु तथा संयोजयेच्छिवे ॥24॥

श्रीराजयदादि संज्ञिकां स्वरूपगां संव्याप्तजितान् ।

कृत्वाऽग्नौ होमयेत्पश्चात् तां तु पूर्तत्वकां बुधः ॥25॥

अथ वा पुनरप्येवं स्थूलसूक्ष्मविभेदतः ।

व्योमानिलानलाम्भोर्वीः पञ्चतत्त्वानि योजयेत् ॥26॥

तेषामन्तर्गतान्यस्तु सर्वतत्त्वानि षडानन ।

कलाभिर्व्यापितांस्तांश्च शान्तिश्रुत्यादिभिः क्रमात् ॥

कलया शून्यया लौहं नाकाशं बैन्दवं परम् ।

व्याप्य सदाशिवं तत्त्वं शान्तया वायुरूपया ॥28॥

तस्याधो या पदं व्याप्त विद्याया तेजरूपया ।

अण्वन्तावन्दनीतं व्याप्य * नैव प्रतिष्ठया ॥29॥

सलिलाख्याञ्चान्तरं पश्चात् ब्रह्माण्डं तु प्रतये ।

व्याप्तं सह सद्रूपा द्विनाम जाकेरा मयम् ॥30॥

यद्वक्ताण्डया व्याप्य तदभूत्वे निति चोच्यते ।

वायव्य यागतो वायुस्तेजस्तेज सदाप्रतः ॥31॥ ?

आपो वारुणस्था प्रोक्ता उर्वी पार्थिवया कृता ।

स्ना?

86 B यदन्तरं यया व्याप्य तस्य ना ना तु तत्त्वभूतः ॥32॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बहिरेवं स्थिता ह्यत्र शरीरे ह्यसु तत्वतः।

शोधयेत् क्रमेणैवं षड्भागात्मसंस्थितः॥३४॥

संहितायां पूर्व(वे) मूलं तया नाडी विशोधयेत्।

शान्तिमार्गं न्यसेत् तावद्यावन्नाभौ च मणिपूरकं॥३५॥

तन्मात्रैः पञ्चभिर्युक्तं गुणैश्च त्रिभिरावृतः।

मनो बुद्धि अहंकारैः स्थितानि हृदि पुष्कलः॥३६॥

भानौ कर्णान्तरात् पूर्वं शान्त्यतीते कलां न्यसेत्।

तस्याधो हृदयात् पूर्वं मण्डले शान्तिमेचके॥३६॥

हृदयाद्यावन्मेढ्रान्तं विद्यां तेजसि योजयेत्।

मेढ्राधो यावज्जान्वन्तं प्रतिष्ठां वरुणे न्यसेत्॥३७॥

तस्याधः पार्थिवं तत्वं यावत्पादतलान्तिकम्।

निवृत्तिं योजयेत्तत्र इत्यात्मा पूर्ववन्निरोधयेत्॥३८॥

विश्वेश्वरं बीजं कलाकृत्यां प्रकल्पयेत्।

कवचादि शिवाङ्गानि पुरश्चर्यकाः क्रमात्॥३९॥

ऊर्ध्वं वारुणबीजाभ्यां तेजसानिलखात्मजैः।

संयुतास्ते स्मृतास्तत्वा यो मा इयो ~~[illegible]~~ धनावसानिकाः॥

ह्रस्वाद्यौ ये स्वरा पञ्च नपुंसकविवर्जिताः।

तन्मात्रसको ते, विज्ञेया गन्धाद्या देशिकोत्तमैः॥४१॥

अहंकारश्च संज्ञं ते, अम्बुक्षीकीर्ति संज्ञकम्।

मकारस्तु मनः प्रोक्तः ... तमः परिकीर्तितः॥४२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

[illegible] A रकारं तु रजो विद्धि सं सत्वं तु निगद्यते।

यकारं प्रकृतिं स्कन्द परिकल्प्य विशोधयेत्॥

पृथिव्यादीनि तत्वानि निवृत्यादि विशोधयेत्।

गन्धादि पञ्च सूक्ष्माणि सद्यादि विरकु क्रमात्॥५५॥

त्रितत्वेन तु होतव्यं महंकारादिकं क्रमात्।

प्रणवेन विज्ञान स्रो होम कुर्यात गुणत्रयम्॥५५॥

तत्वे तत्वे तु तत्वज्ञः पञ्च सूक्ष्माणि शोधयेत्।

गुणत्रयं तथाऽयन्तं मनोबुद्धि महं कृत:॥ ५६॥

प्रैकैकस्याहुति शतं दशस्याच्चतुर्द्धेन वार्धवा।

तिलैर्वा घृत संमिश्रैः स्तण्डुलैः शाल्य संयुतैः॥५७॥

श्रीफलै र्बिल्व पत्रैर्वा पुष्पैर्वा४ धान्युग्मकैः इध्मैः।

होमयेत ततो दिक्षु तैस्तु पूर्णाहुतिं तथा॥५८॥

पूर्ववत्योति शुद्धिस्तु तत्व संशुद्धि नैव च॥

क्रमात्संधाय तत्वानि तथा हित्वा शिवं नयेत्॥५९॥

प्रावं दीक्षा मृतस्योक्ता। जीवतो पि हि षण्मुख।

समया दिज निर्मुक्ता स्कन्द बन्धा निकृन्तयेत॥६०॥

सृष्टि संहार योगेन पृथगेत् इति कल्पना।

दीक्षा संहारतः कार्या रेन योर विसं मता॥६१॥

विपन्नस्याखिलं कर्मा हृदये कारणम् समाचरेत्।

आचारोऽयं स्थितं स्कन्द सिद्धयर्थं जीवितस्य तु॥

॥ॐ॥ इति सर्व ज्ञानोत्तरे क्रिया पादे मृतक दीक्षा प्रकरणम्॥ॐ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

87 B अतः यन्त्रं प्रवक्ष्यामि समयाचार संघने।

यथा विलिख्यते देहि विलज्ञो ष डानन ॥१॥

मृदम्भुना तु संशोध्य स्वजनेन मल्लवित्।

आलिप्य गोमयेनैः पूर्वैः स्थापयित्वा शिवां जला ॥२॥

मन्त्रस्नानं विलो येन कृत्वा तु परियापयेत्।

गन्धौ पुष्पै स्वलं कृत्य उपला पाद निवेशयेत् ॥३॥

रक्त गन्धै स्तथा पुष्पै रजै वस्त्रोपवीतकैः।

सं कार्य वस्त्र संयुक्ता शरन्नौ जाफिलि का क्षिपेत् ॥४॥

नीलावा तु शांकरी दीक्षां शार्यस्थाने निधापयेत् ॥

त्रिपञ्चानि पूर्वं तत्र शिवयुग्मं प्रकल्पयेत् ॥५॥

चतुर्हस्तायतं निम्न द्विहस्त सम विस्तरम्।

(सत्र)
अत्र जपे स्तु तत्कीलै र्दिदिशं कीलितो बहिः ॥६॥

विलोमं रक्तसूत्रेण कवचार्णेन वेष्टयेत्।

पीतेन रजला वृत्तं तस्य मध्ये जमालिखेत् ॥७॥

त्र्यस्रा मध्य समायुक्तः शृंगारकं तथोपरि।

रक्तेन रजला तं तु सर्वधान्यमयेन वा ॥८॥

पूर्वोक्तेन विधानेन तत्र वह्निं प्रकल्पयेत्।

अस्त्रेण प्रस्तरं दर्भान् स्रुक्क्रमेण तु देवता ॥९॥

पर्युक्षणं तथा कुर्यात् दार्चिनी रुप्युक्षणं तथा।

(चं)
स्रुवं स्रुचं चतोमान्ते शावस्यो परि विन्यसेत् ॥१०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्ववच्छोधये द्वये दाप्य मार्गं सर्वं विलोमतः ।

तथैवोद्घाटनं कुर्यात् निरोधार्तेन वडावन ॥ ॥ ॥

४४ A तर्पयित्वा तथा वह्निं दत्वा पूर्णाहुतिं ततः ।

ईश्वरादि विलोमेन मन्त्रसिंहासनं न्यसेत् ॥ १२ ॥

सद्यादि मन्त्रविन्यासं दत्वा देहे स्वके गुरुः ।

शिवे शिवासने चैव तथा होमं समाचरेत् ॥ १३ ॥

पूजयित्वा तथा न्यायं गन्धपुष्पैः फलितैकैः ।

अर्घ्यपाद्यादिभिश्चैव यथाशक्त्या विचक्षणैः ॥ १४ ॥

ततः संचिन्तयेन्नाडीः दिव्यरूपा मनोरमाः ।

ततश्चिन्ति ने तत्र चन्दनागरुदादिभिः ॥ १५ ॥

यथावासं भवेत्तस्य कुम्भकोक्तं रं गुरुः ।

पुनरङ्कुशयन्तु प्रेतं मात्रबीजेन षण्मुखम् ॥ १६ ॥

नियति मध्ये नियुञ्जीत वस्त्रं चैन घृतप्लुतः ।

ततः संचिन्तयेन्नाडीं तस्य देहे विचक्षणः ॥ १७ ॥

स्वसंज्ञां हृदि संस्थाप्य तं मध्ये पुद्गलं न्यसे ॥

ततः संधाय तत्त्वानि पादादारभ्य मन्त्रवित् ॥ १८ ॥

हित्वा तु तां तथा मूर्धः पशुं संयोजयेच्छिवे ॥

तत्र संदीपयेद्वह्निं तु मत्वा देव दक्षिणः ॥ १९ ॥

अस्त्रबीजेन मन्त्रज्ञ आगमे होमधारणां स्मरेत् ।

अविच्छिन्नां तथा राम घोरास्त्राणि मार्गतः ॥ २० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आनायित्वा स्त्रबीजेन जलधारां निधापयेत्।

ततो जलं प्रजेद्विद्वान् स्नात्वा तूलोदकं शुचिः ॥२१॥

यागं यथोदितं कृत्वा शिवे देहं प्रपातयेत्।

एवं विमुच्यते देही जन्मादि विलं घनी ॥२२॥

४४ B अज्ञाना*ज्ज्ञानतो वापि कृतौ वृंतेषु कर्मणि।

॥ इति श्री सर्वज्ञानोत्तरे अष्टमे षष्ठि प्रकरणम् ॥-०९-॥

—*—

एवं दीक्षा विधा ख्याता मृतानां चापि शंकर।

तथैवाचार रहिता भक्त्यैषिः पाशशोधिनी ॥१॥

नैष्ठिकानां जनाख्याहि ब्रह्मचर्यो जितात्मनः ॥

ज्ञानचर्याविवतस्यापि कालो कन्ये गतिर्भवेत् ॥२॥

ज्ञानाचर्या द्रितौ बौद्धौ बुद्धि तत्व मवाप्नुयात्।

तावत्वं जिनभक्तानां प्राप्नुवन्ति . . . . . . ॥३॥

ये भवन्त्यजितात्मान स्तेषां मुक्तिस्तु दीक्षया।

चैव तानि च . स्थानिते मुक्तिस्थानानि षण्मुख ॥४॥

मुक्तिस्थानं भवेदेकं निमलं सर्वतो मुखम्।

अचलं वा लकं शान्तं लिङ्गाख्य विवर्जितः ॥५॥

तावन्न नियोज . . नाक्तो शोदय तत्वक्रमेण तु।

यो याति नाशितो लिङ्गी तमादौ पूजयेत्ततः ॥६॥

तर्पयित्वा तथा सम्यक् प्रायश्चित्तं विशोधयेत्।

जलरन्ध्रं त्रिरात्रं वा भावयित्वा षडानन ॥७॥

चहुत्वा षष्ट जलरन्ते तु अस्त्रबीजेन होमयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गुरोः पञ्चसहस्रं तु मूलमन्त्रेण होमयेत्॥

मूलं दीक्षापरा कार्या संसारार्णवतारिणी॥

नैष्ठिको दीक्षितस्त्वेव नियमेन यतिर्धारतः॥९॥

शिवशास्त्रपरो नित्यं शिवहोमरतः शुचिः।

शिवार्चनं शिवध्यायी शिवयोगी सदा भवेत्॥१०॥

89 A अ... ल ना क्षिणं कल्प नानुग्रहं करिष्यति।

शैवब्राह्मणौ शैवे गृहस्थ ब्रह्मचारिणौ॥११॥

लोकानुग्रहकर्तारौ परिव्राट् तापसौ न हि।

ज्ञानं कार्यं विकारोऽयं यावल्लं [illegible] यतः॥१२॥

संन्यासितां विना रस्तु कर्मशास्त्या समाचरेत्।

गृहस्थ ब्रह्मचारित्वं संज्ञामात्रं तु केवलम्॥१३॥

पारमार्थिकमेतेषां नाशमो नाशन क्रिया।

यदर्थं कृतकर्माणो नियुक्ताः परमे पदे॥१४॥

तदर्थं नाशनः प्रोक्तः शिवशास्त्रसमाश्रितः॥

पूर्वसन्ध्या जपं होमं यथाकर्म क्रमागतः॥१५॥

स्थित्यर्थं माचरेत् किञ्चित्सततं मन्त्रतत्परः।

चाण्डालो वा स्थितो दीक्षां प्राप्तो देही शिवात्मकम्॥

तत्र वसंस्थितो नित्यं शिवकर्म प्रकल्पयेत्।

यदुक्तं शिवशास्त्रेऽस्मिन् व्युक्तं कर्म षडानन॥१७॥

तदवश्यं तु कर्तव्यं तद्विलङ्घ्य विलङ्घनम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आज्ञेयं कारणं ज्ञेयं नो विकल्पो कदाचन।
सिद्धे यं साधनं नास्ति दूषणं नैव विद्यते॥
न पुंहि शार्दूलकं वाक्यं दैविकं रिपि तथा॥१९॥
न देवः ब्राह्मणो वाक्यं लैङ्गवं पद्मजन्मनः।
न शैवं विष्णुना वाक्यं बाधयते तु कदाचन॥२०॥
यो हि बाधति मूढात्मा स नष्टो मूढचेतनः।
उत्तरोत्तर वैशिष्ट्यं सर्वेषां परिकीर्तितम्॥२१॥
४१ B वाक्यानां वाक्यवित् प्राज्ञो ज्ञे तथा गुह्यं हितैषिभिः।
वर्णाश्रमाचार प्रायश्चित्ता इव लौकिकाः॥२२॥
सम्बन्धो देशधर्मश्च प्रसिद्धां न विचारयेत्।
गर्भाधानादितः कृत्वा यावदूर्ध्वं नैवको॥२३॥
तावत्तु वै दिकं कर्म पश्चात्तु वेदमन्त्रेण मात्।
न कुर्यात् प्र.. नष्टो ये स्कन्द लोके धर्मं समाचरेत्॥
नान्यं शास्त्रे दृष्टं नान्यं देवतां स्मरेत्॥
विशुद्धे भावनायुक्त शिवैक गत मानसः॥२५
विशुद्ध मातृमात् स्नान माचान्त्य सर्वगाः पूर्वं॥
शावलं कर्म सन्देह सत्कृतं कृतको ध्रुवम्॥२६
नेह मन्त्र फलं तस्य नैवाप्नोति स्कन्द भवेत्॥
यस्तु संचरति संप्राप्य [illegible] कर्म समाचरेत्॥२७॥
तत्कर्म परतां नित्यं कुर्वीत.. देवा .. तः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शास्त्रस्यैवाविरोधेन रुद्र कर्मा जितेन्द्रियः॥
अनेनैव स्वदेहेन सिध्यते नात्र संशयः।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्शुद्धस्तु साधकाः॥
सुवर्णा दानु पूर्वेणाचार्यस्य षडानन॥
शुद्ध ध्याना निस्पृहाश्च कर्मज्ञाः कर्मतत्पराः॥३०॥
अनुरक्ता शिवभक्ताश्च ते त्वानुग्रहकाः स्मृताः।
कृष्णवर्ण मृगो यस्मिन् चरते तु षडानन॥३१॥
तद्देशं यज्ञियं विद्यात् यस्य विप्रैरधिष्ठितः।
१० A यत्र विप्रास्सदाचारा यत्र यस्य तपोधनाः॥३२॥
संनिवेशास्तथा वेदाः पुण्यदेशं तथा दिशेत्।
तद्देश कुल संभूता आचार्या शास्त्र संमताः॥३३॥
शिवशास्त्र परं नित्यं शिवार्चाग्नि परायणाः।
आ पाद मस्तकं यावत् भस्मस्नानं द्विजस्य तु॥३४॥
(ना?)
सा भेरूर्ध्वं रूपस्योक्तं भारतेन तु भस्मना।
वैश्यस्य पादुका प्रोक्ता शूद्रस्य तु त्रिपुंड्रकः॥३५॥
भस्मना ब्रह्म जप्तेन यथा स्थानेष्वनुक्रमात्।
ब्राह्मणस्य जटा श्लक्ष्णाः कनकाः परिकीर्तिताः॥३६॥
स्थूलास्तादृग्गुणा ज्ञेया क्षत्रियस्य तु व्यन्तराः।
वैश्यस्यैवा शिखा स्याने तथा शूद्रस्य कीर्तिताः॥३७॥
ह्रस्व श्लक्ष्णा ऊर्ध्वसंयुक्ता स्वं यतस्य जितेन्द्रियः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यज्ञोपवीतसूत्रं तु विप्रे पञ्चसरं मृतम् ॥

त्रिसरं क्षत्रियस्योक्ता: वैश्यस्य द्विसरं स्मृतं।

शूद्रस्यैकसरं ज्ञेयं तिलकं गन्धयोगधारिणः ॥३१॥

अर्घ्याद्या नागिनकार्यैर्वा लब्धा काले च वा यथा ॥

॥ इति श्री सर्वज्ञानोत्तरे लिङ्गोद्धारादि प्रकरणम् ॥

आभिषेकविधानं तु संप्रवक्ष्याम्यतः परम्।

हिताय देशिकेन्द्राणां यथा शम्भुमुखाच्छ्रुतः ॥१॥

पूर्वोक्त भूतले शुद्धे गोमयेनोपलेपिते।

सर्वशोभाभिरम्ये तु सर्वगन्धविभूषिते ॥२॥

सुतिथौ वार नक्षत्रे मुहूर्त करणान्विते।

शुभग्रहोदये लग्ने शकुने मंगलैर्युते ॥

सत्यव्रतचरं दान्तं योगयुक्तं दयान्वितम्।

प्रसन्नवदनं दक्षं गुरुभक्तं दृढव्रतम् ॥४॥

शौचाचारसुसंपन्नं योगयुक्तं जितेन्द्रियम्।

शिवभक्तं सदाशान्तं शिष्यं (तत्त्व?) तन्त्रस्य पा(र)गः ॥५॥

यागमुक्तो यथोद्दिष्टं दीक्षां निवृत्यं मन्त्रवित्।

ततो विभवयेत्तं तु युक्तायुक्त विचारकः ॥६॥

वीणावेणुमृदङ्गाद्यैः काहलैः पटहादिभिः।

शंखतूर्यनिनादैश्च नृत्तगेयसमन्वितैः ॥७॥

सर्वमंगलसंयुक्त मभिषेकं समारभेत् ॥

Center for Shaiva Studies, Pondicherry Collection

यागाद्दक्षिणपूर्वेण पश्चिमे चोत्तरेण च ॥

यतो द्वारं बाह्ये पश्चात् तण्डुलं परिकल्पयेत् ॥

द्वात्रिंशदङ्गुल विस्तार मुच्छ्रायं तावदेव हि ॥९

(श्रं)
चतरस्रं समं इद्धं मध्ये कमल भावितम् ॥१०॥

पूर्ववत्पीठविन्यासं तस्मिन् संस्थाप्य पूजयेत् ।

इन्द्रपदास्थितं स्नातं मन्त्रालं कृत विग्रहम् ॥

ततः कुम्भान्यथा पूर्वं पूर्वादारभ्य कल्पयेत् ॥११॥

शिवकुम्भविधानेन मन्त्रदैवतसंयुतम् । A

अष्टौ विद्येश्वरान् मन्त्री अष्टाभिः संनियोजयेत् ॥१२॥

चतुर्वर्गान्यथा स्थानं पञ्च ब्रह्माणि पञ्चसु ।

अस्त्र जप्तं कुम्भकं शिवजप्तं तथा परः ॥१३॥

गायत्र्या चमनार्थं तु वर्ध्यां परिकल्पयेत् ।

९। A शतमष्टोत्तरं जप्त्वा शिवास्त्रमभिमन्त्रयेत् ॥१४॥

(स्त्र)
प्रथमं याग बीजेन स्नापयित्वा विधान वित् ।

विद्येश्वरैस्ततः पश्चादनन्ताद्यैर्यथाक्रमात् ॥१५॥

ब्रह्माणिश्चानुपूर्वेण पुनरङ्गान्यनुक्रमात् ।

अभिषेकं शिवेनैव पश्चात् कुर्वीत बन्धुरम् ॥१६॥

ततो गन्धैश्च पुष्पैश्च वस्त्रालंकार पादुकैः ।

वज्र छत्र पवित्राद्यैः मकुटं पट्टं निवेदयेत् ॥१७॥

पूजयित्वा विधानेन शिववत्तं तु देशिकः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवसर्वार्थं सदा नित्याधिकारं समर्पयेत् ॥

गुरुणा योऽधिकारस्तु आत्मवत्समर्पितः ।

अथ प्रभृति योगीन्द्र सोऽधिकारो मया त्वयि ॥

अनुज्ञातास्तथा शिष्या शास्त्रदृष्टेन कर्मणा ।

श्रोतव्यं शिवशास्त्रं च श्रावणीयं तदर्थिनाम् ॥२०॥

संवत्सरोषिते शिष्ये दीक्षां निर्वर्तयेद्बुधः ।

साधके मन्त्रदीक्षां तु याचनात् तत्त्वे निवेशयेत् ॥२१॥

इतरे पूर्णाहुतिं दत्वा शिवहस्तं प्रकल्पयेत् ।

समया भूपयेत्पश्चात् ब्रह्मज्ञानं तथैव च ॥२२॥

न निन्द्या तु कारणं देवं तच्छास्त्रं च शिवोद्भवः ॥

दीक्षकं पूजकं चैव गुरोर्वाक्यं न लंघयेत् ॥२३॥

स्मृतिकार्यं न संस्पर्शे छाया चातुर लंघनात् ।

यत्नेन वर्जयेत्प्राज्ञो देवजातं च लौकिकम् ॥२४॥

९। B इत्येते समयास्त्वष्टौ समासात्परिकीर्तिताः ।

पालनात्तु शिवं यान्ति सन्निरोधं ततोऽन्यथा ॥२५॥

शि

पिण्डमन्त्रा स्वेतस्त्राण्या वत्सरान्मोशिवशिवस्तथा ।

(ज्ञे)

समयज्ञो विबिन्दं ज्ञानमन्त्र उद्भवं न दापयेत् ।

ब्राह्मणाः क्षत्रिया वैश्याः स्त्री शूद्रादि नपुंसकाः ॥

दीक्षाकाले विनी मांत्या ज्ञानदाने विचारयेत् ॥३७॥ 27

त्रिचतुः पञ्जातिः विप्र क्षत्रिये नव जन्मनिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अघोरी ईशानी वैश्ये ईशके लिंशाद्यो दापयेत् ॥

उक्तं सर्वशास्त्राणां शिवशास्त्रात्मकं गुह ।

(लि)

गुह्याद्गुह्यतरं गुह्यं गोहितव्यं प्रयत्नतः ॥ २९ ॥

नाशिवाय प्रदातव्यं नाभक्ताय न नास्तिके ।

न गुरुद्वेषिणे चैव नान्यशास्त्ररताय च ॥ ३० ॥

यस्य देवे परा भक्तिः नित्यं गुरौ च षण्मुख ।

नान्यशास्त्रे यथा भक्ति ज्ञानं तस्मिन्नियोजयेत् ॥

न जल्प शिवशास्त्राणि प्रकुर्वीत कदाचन ।

? नवारणं कुर्याद् परोहे जनसं·· ॥ ३२ ॥ ?

विविक्ते निर्जने रम्ये पूज्य विद्याधिपं गुरुम् ।

जितेन्द्रियः शुचिः स्नातः शिवज्ञानं तु भावयेत् ॥ ३३ ॥

श्रोतव्यं पतितैर्भक्तैः स्तब्धैस्तैः स्तवपरायणैः ।

आदावन्ते च संयोज्य गुरुसंभावभावितैः ॥ ३४ ॥

(तु)

पौर्णमास्याममावास्यां पर्वदृश्यष्टमेषु च ।

नाद्याय येच्छिवज्ञानं गतप्राये न लोभिषु ॥ ३५ ॥

९२ A सावि शैवजपं पूजा व्रतं होमं समाचरेत् ॥

दानोपवासनियमात् सर्वमेव तेषु षण्मुख ॥ ३६ ॥

कृतघ्ना नास्तिकाः क्रूराः निस्सत्याः कलहप्रियाः ।

मायाशास्त्ररतोपेता भ्रमन्ते तन्त्रहारिणः ॥ ३७ ॥

पृच्छन्ति गद्गदैर्वाक्यैः शैवपुस्तकान्स बोधतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

92 A तेषां न विश्वसेद्धीमान् यदि स्युः स्थानिनायकाः ॥३८॥

ज्ञानं कार्याधिकारो हि यावत्संक्रमितो भवेत् ।

सङ्क्रान्ताधिकारस्तु कर्मसन्यासमाचरेत् ॥३९॥

(मि)
साधकस्य हि जेकस्तु ज्ञानं बलं विधीयते ।

(वं)
आचार्यसाधकस्यैव ज्ञानेतौ तुल्यमङ्गलौ ॥४०॥

समान्तु विशेषकर्तव्यो गुरुस्साधकज्ञानयो ।

सत्यान साधको ज्ञेयो निष्ठा मे दैशिकः स्मृतः ॥४१॥

ज्ञानज्ञानक्रियाकारी ज्ञानयोग प्रधानयोः ।

सोमर्थं होमं जपध्यानं कुरुते दैशिकस्सदा ॥४२॥

(नि) (वं)
कर्मनिष्ठा ज्ञाननिष्ठा हि सततं साधकोत्तमः ।

इति श्री सर्वज्ञानोत्तरे क्रियापादे अभिषेक प्रकरणम् ॥

— × —

अतः परं प्रवक्ष्यामि स्नानं विधानुसारतः ।

पञ्चभिः कलशैर्वापि पूर्वोक्तविधिकल्पितैः ॥

अष्टौ विद्येश्वरान् मन्त्री ज्ञात्वा तेन विनियोजयेत् ॥

द्वितीये पञ्च ब्रह्माणि तृतीये गः चतुष्टयम् ॥२॥

अस्त्रं युक्तं चतुर्थं तु शिवकुम्भजलं च पञ्चमकम्

92 B अभिमन्त्र्य यथान्यासं पूर्ववत्स्नानमाचरेत् ॥३॥

चतुर्दिक्षु यथा कुम्भौ अभिषेकं समाचरेत् ।

विद्येश्वरा यथा पूर्वं ब्रह्माङ्गानि च मन्त्रवित् ॥४॥

ज्ञात्वा तेन कलशे योज्य मन्त्रं युक्तं तृतीयकः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चतुर्थं शिवकुम्भं तु आग्नि विन्यसेत्पूर्ववत् ॥५॥

अथवा द्वौ पुनः कुम्भौ आग्नेये वायु कल्पयेत् ॥६

शक्तिनिधा सर्वमन्त्रांश्च शिवकुम्भं (तु) तीर्थकः ॥६॥

~~पञ्च~~पञ्चपत्रपुटैर्वापि शंख रुद्रकाया नवा पुनः ।

आग्नेयकं प्रकुर्वीत ततोऽनु स्नापयेत्पुनः ॥७॥

पुष्पैर्वा गन्धमाला वापि नाना वापि महाप्रभा ।

अनन्तु स्नात गन्धमत्तु नैकुर्यान्मात्रिकां विधिम् ॥८॥

स्रुवं स्रुचा प्रस्रुत्रमेव संगृहेत ततः क्रमात् ।

त्रिकाल तर्पणं .. जपं होमं समाचरेत् ॥९॥

॥इति सर्वज्ञानोत्तरे क्रियापादे शं क्रिया निर्वाण प्रकरणम् ॥

— ·x· —

(स्रुवलक्षणम्)

स्रुवस्रुवक्रस्त्रालस्य निवाते स्वेच्छु लक्षतः ।

जपवले सिद्धि फलमाणो प्रवक्ष्यामि यथा पूर्वशः ॥१॥

स्रुवं हस्तप्रमाणं तु, आधारो मुष्टि वर्तुलः ।

बाहुमात्रं स्रुचं ज्ञेया पुष्करं संनि ... ॥२॥

नाना शाखवतो विततं तु, कैंकतं तं वा पुनः ।

स्नात्वा शिवो रुद्रबीजेन धारणानि विशोधयेत् ॥३॥

ततश्च मनन गन्धेन पुनर्गर्भे दलेन तु ।

93 A त्रितत्वं शक्तिबीजं तु होमयेत् कुम्भयोः सदा ॥४॥

गन्धपुष्पैरलंकृत्य धूपं दत्वा विधानवित् ।

सप्तरात्रं स्थितिं कृत्वा पश्चाद्धोमे नियोजयेत् ॥५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पुत्र पौत्र फलं कृत्स्नो मध्ये गत्वा विशोधयेत्।

सहस्रं गोप्रदानं ... विशोधयेत् ॥६॥

सिद्धात्तु पूर्वं वनमन्त्रो अस्त्र गन्ध शिवाङ्कुना ।

शिवो कृत्वा तु तं वृक्षं शिववत्प्रति पूजयेत् ॥७॥

पुरस्ताद्दक्षिणायां तु शास्त्र दृष्टेन कर्मणा ।

कृत्वा भूत बलिं दत्वा पश्चा दक्षाणि संहरेत् ॥८॥

मध्ये शाखा जनुद्भूते मन्त्र मार्गते येऽम्बिव: ।

पूर्व शाखोद्भव स्कन्द जपे तत्पुरुषं विबुध ॥९॥

अघोर वामदेवौ वा सद्योजाताङ्ग भैरवो ॥

ये यथा वाञ्छिता मन्त्रा स्तैस्तु तान् परिकल्पयेत् ॥१०॥

वायव्या नल ~~ईशान्ये~~ माहेन्द्र वरुणा वाथ निऋता: ।

तेभिस्व स्त्रोतजै रुद्रे सर्व सिद्धयन्त्ये संशय: ॥११॥

कंण्ठो कर्णितु स्तत्रेण त्रिगुणं त्रिगुणे न तु ॥

अक्षमाला प्रकुर्वीत रुद्रं नागो दकेन तु ॥ १२ ॥

(शा)
शत मष्टोत्तरं वापि चतु: पञ्चाशदेव वा ।

सप्त विंशति वा मन्त्री अक्षमाला शुभा स्मृता ॥ १३॥

(ण्यो)
शाक्तिट्यो सं पुरा कृत्वा तान्मन् स्त्रत्रे निवापयेत्।

९३ B वेधये दन्ता वीजेन प्रोतये हृदयेन तु ॥ १४॥

अन्योन्यं सलिंयितं कृत्वा मुखं तेषां सु संहतान्।

निरुजांति प्रमाणं रुद्राक्षान् न भिन्ना मल वर्जितान् ॥१५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततः शिवाम्भसा क्षाल्य पुनर्गन्धैर्विमृजयेत्।

स्वस्रोते विन्यसेत्संधिं वीरपत्रस्तथोपरि ॥16॥

मयूरचन्द्रकैश्छाद्य पश्चा दक्षाणौ योजयेत्।

वीरपत्रस्य तथा चैव पश्चा दालजान्तं कुरु ॥17॥

स्वमन्त्रं पूजयेत्तत्र गन्धपुष्पैरनुक्रमात्।

शिवीभूतं तु तल्लिङ्गं संपूज्य त्वा दिने दिने ॥18॥

ततस्तं मुद्रकमन्त्री मांगा लब्धे निधापयेत्।

सौवर्णे राजते चैव ताम्र लिङ्गे र्थ के पिवा ॥19॥

स्तम्भनं मोक्षणं चैव स्थापनं च विधानवित्।

हृदये तु कर्तव्यं तर्पणं च विलेपनम् ॥20॥

अतः संक्षेपतो वक्ष्ये भूयो श्रृणु विधिं परम्।

आहृत्य निकुम्भाद्यान् अस्त्रजप्तेन मन्त्रतः ॥21॥

संशोध्य वारि पूतेन धारणा निपुणः क्रमात्।

ततस्तु पञ्च गव्येन पुनर्गन्धोदकेन तु ॥22॥

ततः शिवाम्भसा क्षाल्य पुनर्गन्धैर्विमृजयेत्।

यागं कृ———त्वा यथोद्दिष्टं पूर्वोक्त मेरवलं यथा ॥23॥

ततस्तु प्राणसंघात माकृष्य हृदि मण्डले।

त्रितत्वे महयगो भूत्वा जपं कुर्यात्समाहितः ॥24॥

94 A (त्रितत्व महयगो भूत्वा जपं कुर्यात्समाहितः 3

त्रिजिस्तु पुष्पकै नित्यं यावत्संख्या प्रपूर्यते ॥25॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तावत्तद् गन्धतोयेन शिवस्य जपमर्पयेत्।

जपं कृत्वोदितं कृत्वा पुनरीशं प्रसादयेत् ॥26॥

तदा कृत्वा तथैवेह व्रतमन्त्रैः जनाञ्चरेत् ॥27

॥इति श्री सर्वज्ञानोत्तरे क्रियापादे स्नपनादि प्रकरणम्॥

= x =

अतः परं प्रवक्ष्यामि व्रतानां व्रतमुत्तमम्।

शिवव्रतमितिख्यातं सर्वदा सुरपूजितम् ॥1॥

त्रिपुण्ड्रं पाण्डरं भस्म रुद्राक्षालानुलेपनम्।

रुद्राक्ष यज्ञोपवीती च जटामकुटमण्डितः ॥2॥

सर्वाभरणसम्पन्नो रुद्राक्षमाला विभूषितः ॥

परमात्म ब्रह्मार्पयन्त्य शिवाग्निगुरुपूजितः ॥3॥

मन्त्रमूर्तिं शिवस्यैव यथा पूर्वं प्रकीर्तितम्।

तथा वै साधकैः ज्ञाना व्रतज्ञेयं तथात्मकम् ॥4॥

(पी) क

रुद्राक्षौ कौपीन वालेवे उष्णीषा भूत मण्डलुम्।

शिवालये वसेन्नित्यं भिक्षाशी जितेन्द्रियः ॥5॥

शिवध्यानरतो मौनी शिवाग्निगुरुपूजकः।

संवत्सरे व्यतिक्रान्ते शिव तुल्यो भवेदिति ॥6॥

॥इति सर्वज्ञानोत्तरे क्रियापादे शिवव्रतप्रकरणम्॥

= x =

अतः परं प्रवक्ष्यामि लक्षणं तु शिवालये।

स्थापनं चैव लिंगस्य यत्नेन सर्वप्रतिष्ठितः ॥1॥

95 b ब्रह्माद्या देवताः सर्वे लिङ्गमाश्रित्य संस्थिताः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मात्तु स्थापयेल्लिङ्गं शास्त्रदृष्टेन कर्मणा ॥२॥

शिवज्ञो विद्याव्रती योगी गुरुदेवाग्निपूजकः ।

आचार्यस्सत्वनिष्ठोनात् विशिष्टकुलजः शुचिः ॥३॥

सर्वलक्षणहीनोपि शिवशास्त्रार्थविद्गुरुः ।

स्थापकस्स परः प्रोक्तः शिवविच्छास्त्रसंमतः ॥४॥

सर्वलक्षणसम्पन्नः सं स्यात् शास्त्रं न विन्दति ।

न योगी न व्रतस्नातो नाचाचार्य उच्यते ॥५॥

न शठो नास्तिकः क्रूर पिशुनो न च मत्सरी ।

कुष्ठीक... सरवी व्यङ्गः क्षयरोगी जलोदरी ॥६॥
? . . . ?

काणः केकर पिङ्गाक्षः कपाल कुते शेखरः ॥

सर्वदोषाश्रयं वत्स तार्किकं तु विवर्जयेत् ॥७॥

भोजका देवजश्चापि देव व्रतधराश्च ये ।

विनाग्नि नैष्ठिकाश्चैव स्थापनेषु विवर्जयेत् ॥८॥

स्थान शुद्ध्यात्म शुद्धी च द्रव्य शुद्धिं तथैव च ।

मन्त्रस्य लिङ्ग शुद्धिं च विदित्वा गां कृत् ॥९॥

शिला... जलास्त्र तोयेन स्थान मभ्युक्षयेत्ततः ।

माहेन्द्रं वारुणं वापि पुनः क्षेत्रं प्रकल्पयेत् ॥१०॥

दिशां बन्धं ततः कुर्यात् यथा पूर्वमुदाहृतम् ।

स्थान शुद्धिर्निवेदेवं देह शुद्धिः प्रचोदिता ॥११॥

95 A मन्त्रशुद्धिर्मनों ... मन्त्री मन्त्र विचक्षणः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मलाद्यैश्वर्यज्ञानानि मन्त्राणां कीर्तितानि तु॥
तेषां प्रबोधिनी शक्तिः शिवाज्ञानेन मन्त्रता॥
मन्त्रशुद्धिरेवं समासात्परिकीर्तितः॥१३॥
द्रव्यशुद्धिस्तु द्रव्याणां प्रोक्षितानां शिवाम्भसा।
लिङ्गशुद्धिं पुनर्वक्ष्ये विशातां यार्थमन्यजे॥१४॥
लक्षणं चैव लिङ्गस्य क्षेत्रसान्निध्यतां व्रजेत्।
लिङ्गाद्धस्तशतं क्षेत्र माचार्यं स्थापितस्य तु॥१५॥
स्वायंभुवे सहस्रस्या द्विगुणितस्तु सदर्शकान्।
भूमि संशोधनं कृत्वा क्षेत्रस्य जननं कुरु॥१६॥
जनिते तु शिवक्षेत्रे पश्चाद्भुपरिग्रहः।
शिलान्यासं ततः पश्चात् स्नात्रयित्वा विधानवित्॥१७॥
हेमरत्नादिभिर्बीजै र्भूषयित्वा निधापयेत्।
पुण्याहजय शब्देश्च शंखवाद्यकनिस्वनैः॥१८॥
बाहुर्गिगल निर्घोषैः पूज्य विष्णु विनायकान्।
दिशाबलिं ततोदत्वा प्रपूजयित्वा दिगीश्वरान्॥१९॥
आचार्यः शिल्पिभिः सार्धं लिंगं कुर्यात्स लक्षणम्।
स्थपतिश्च यथा दिष्टं प्रासादं शास्त्रसम्मतम्॥२०॥
प्रासादाङ्गानेवाल्लिङ्गं लिङ्गं प्रासाद एव वा।
यदेव स्थापितं पूर्वं तेन सूत्रेण शोधितम्॥२१॥
९५ अस्त्रयागं पुनः कृत्वा अस्त्रेरस्त्रं नियोजयेत्।
B. स्नापयित्वास्त्रतोयेन गन्ध पुष्पै र्नियोजयेत्॥२२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धूपं दत्वा विधानेन रागिमेकां निधापयेत्।

वस्त्रशय्यां समास्तृ कुठारं दद्भः मुद्गरम् ॥24॥

घृतेन मधुना स्थाप्य मुखवा तेनो पुनः क्रमात्।

अस्त्रान्ते जपतो ध्याने प्रवेशे हृदयं जपेत् ॥25॥

संप्राप्यो दिन शौल्लं तु तत्र शय्यां पुनः क्रमात्।

कृत्वा भूतबलिं दत्वा हृदयं परिवर्तयेत ॥25॥

तस्य पादां शिरोलां प्रश्न विवर्तो लौमय दर्शनम् ॥

विवर्णानि नवकेशांस्तु विरुद्धांस्तु निदर्शनात् ॥26॥

अस्त्राभिमन्त्रितं कृत्वा स्वप्नेना लक्षणं कुरु।

तेनैवाभ्यर्चनं भूय स्तत्र कर्म समाचरेत् ॥27॥

अथ भागे प्रकुर्वीत . . . . तालकाः।

पूर्वमुत्तर मीशानं मस्तकं परिकल्पयेत् ॥28॥

वृक्षस्य पूर्वतः पूर्वं प्रासादे पूर्वतो मुखे।

यतो वा यदि भावे द्वारं तत्र तत्रं तु कल्पयेत् ॥29॥

एवं स्थानमेवं तु पूर्वेण प्रासादे पश्चिमामुखम्।

दक्षिणेन तथा कुर्वीत पश्चिमे पूर्वतो मुखम् ॥30॥

उत्तरेण तथा भूय पूर्वं पश्चिमे ·· नवा ॥

द्वारं तु मध्यतः स्थाप्य भागि भागवशाद्भवेत् ॥31॥

९८ A नोत्तराभिमुखं देवं न कुर्यात् दक्षिणामुखम्।

विदिशास्तु नेव —— क्वापि न कुर्यात् कदाचन ॥32॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अन्यथा स्थापये मातानां दैवानां शिरसि संभव।

दुर्गां स्वं विगतद्या राजा कुप स्गौ गमाति च ॥33॥

उच्छ्रायां देव कुर्वीत विस्तारं द्विगुणं बहिः।

चतुरश्रायां वर्तुलं वा पद्मं गो .. पुराज्वितम् ॥34॥

प्राकाराभ्यन्तरे भ्रौतु पार्श्वे विन्यसेत् मन्त्रवित्...।

प्रासा ~~~~ दानि ~~~~ पुरस्तात् कुर्यात् गर्भ निर्गतैस्तु वै धयेत् ॥

इन्द्र पावक धर्मेशो निरुत्यर्थानि वरुण निलात्।

कुबेरं च तथैशानं स्थापयेत्तेषु देवता ॥36॥

द्वारदेशे बहिः स्थाप्यौ दुर्गा विघ्नविनायकौ।

स्थाप्यौ नन्दि महाकालौ शिवस्य पुरतस्तथा ॥37॥

शिवलिंगं ततो मध्ये पञ्चेषु मध्यमकल्पयेत्।

संपूर्णौ द्वार पार्श्वे तु पृष्ठे मुन्नत मस्तकम् ॥38॥

अवकाश प्रायं द्वीता प्रमाणक ... स्थितम्।

~~अ~~ र्धचन्द्रं चक्राक श्रीवत्स स्वस्तिकाङ्कितम् ॥39॥

एकहस्तं द्विहस्तं वा त्रिहस्तं वापि कल्पयेत्।

चतुर्हस्तं पञ्चहस्तं वा कुर्यात् मध्यम .... ॥40॥

सप्ताष्ट नवहस्तं वा उत्तमं परिकीर्तितम् ॥

श्वेतं रक्तं तथा पीतं कृष्णं विप्रादितः क्रमात् ॥41॥

गुरु लिंगं सुगन्धं च सुस्वरं तेजसान्वितः।

96 B ध्यानिभाषाजे तु गृहं चतुर्णां च मविशेषतः ॥42॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्व शल्य विनिर्मुक्तं सर्व दोष विवर्जितम्।
सर्व लक्षण संयुक्तं शिव लिङ्गं विधापयेत् ॥५३॥
अंगुल्यष्टं गुलं वापि कुर्यात्तु चतुरंगुलम्।
अष्टाङ्गुल वितस्तिं वा मणि रत्नमयं शुभ: ॥५४
सततं रत्न लिङ्गानां प्रासादो न विधीयते।
प्रासादे वा गृहे रम्ये यत्नेष्टु सं प्रपूजयेत् ॥५५॥
यथा मण्डले लिंगं वेदीकार्या तदायवा।
लिङ्गं वेधा समुद्देयं वेदि लिङ्गं विना स्मृत: ॥५६॥
सौवर्ण राजतं वापि ताम्रं वा विमलं भवेत्।
अभावे रत्नवेदीनां रत्नलिङ्गेषु कीर्तिता ॥५७॥
वेद्या: पूर्वापरं ज्ञात्वा तथा वोत्तर लक्षणम्।
(यो)
मध्ये प्रवेशनेश लिंगं द्वौ भागौ बाह्यत: स्मृतौ ॥५८॥
भाग द्वयं भवेदूर्ध्वं तृतीयं सं प्रवेशयेत् ॥
विहितं रत्नलिंगानां स्थावरे होमके . . ते ॥५९॥
तेषां हि लक्षण मध्ये उत्तरे प्रयत्नत: ॥
भाग त्रय समं कृत्वा तत ऊर्ध्वं परित्यजेत् ॥६०॥
तत्र सर्वत्र समं श्रेष्ठ सुवृत्तां छत्र मस्तकम्।
सर्व दोष विनिर्मुक्तं सर्व लक्षण संयुतम् ॥६१॥
(शो)
चतुरश्रं मध्ये भाग मष्टाश्रं मध्यमं स्मृतम्।
वृत्तं चैव तदूर्ध्वं तु प्रकुर्वीत षडानन ॥६२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

९७ सुषिरद्वयं लिङ्गस्य कुम्भकुड्मलमध्यमे।

एकमध्ये ततः कुर्यात् चतुरश्रं ततः पुनः॥

परिपूर्णोत्तरं मध्ये अत ऊर्ध्वं कृतं भवेत्॥

अष्टाश्रं वा प्रकुर्वीत सुवृत्ताकारमध्यकम्॥५४॥

समाग्रं त्रिगुणं रुद्रं लिङ्गस्यैकं त्वारदर्शनः॥

मृदङ्गाकारतं ज्ञेयं मृदङ्गाकार‥ त्रिलिङ्गः॥५५॥

स्थापितं भवेदथापि स्थितं वा विवर्धयेत्।

मणिरत्नमयं लिङ्गं पुनः संस्थाप्य पूजयेत्॥५६॥

उत्तरप्लवनं वापि दर्पणोदरसंनिभः।

मेखलाद्वादशांशेन प्र… पार्श्वं भागिकः॥५७॥

प्रमाणं लक्षणं चैव मणिरत्नमयेष्वपि।

स्थापनं पार्श्वतं प्रोक्तं विस्तरेण विधिं शृणु॥५८॥

अथ गर्भगतं पुरस्कन्द लिङ्गस्य त्रिगुणं कुरु।

मध्यमांशे द्वयस्य वेदी भित्तिर्वेदी समा स्मृताः॥५९॥

त‥ तु प्रमाणं भवेद्द्वारं विस्तरेण विधानवित्।

उत्सेधाय त्रिगुणं कुर्यात् स्तम्भो कल्पसम्मतम्॥६०॥

षड्भागमध्ये स्थापयेत् द्वारमध्यमतः स्थापयेत्।

कल्पयीत यथा दिक्षु मध्यमयोः कृता शृणु॥६१॥

द्वित्रि भागे तु संस्थाप्य यो भागस्य बाहुकम्।

ऊर्ध्वभागे प्रकुर्वीत द्वारं वै मध्य संस्थितम्॥६२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भागमेकं परित्यज्य द्वौ भागौ प्रकल्पयेत् ।

97 B तद्भागं पूरयेद्बुद्धौ शेषं लिङ्गं क्रमेण तु ॥ 63॥

अथो वेदिं शिरं कृत्वा निर्वाणां कुसुमान्विता ।

सुश्लिष्टा निष्कलं स्वस्थं यावत्क्षेत्र लता . . . ॥64॥

(पीठस्थं)

ततस्तत्र बेरं च पीठस्थं रचनां कुरु ।

विहिता शास्त्रदृष्टेन सर्वकर्माणि चैव हि ॥ 65॥

लिङ्गाद्यं तथा गर्भो भक्तिश्चैव षडानन ।

प्रासादं च तथा तत्र लिङ्गं मानेन कारयेत् ॥66॥

तल्लिङ्गं मंजरीश्याचित्रे . . . . ।

शुकनासा महासेन शिखरं चैव लिङ्गितम् ॥67॥

तल्लिङ्गिकं पुनः स्तम्भं गर्भाकुञ्जयतोन्यसेत् ॥

दिग्गजा कुम्भ यावर्षेन शुकनासस्य मण्डपम् ॥68॥

गर्भस्योजयतो लिङ्गं मेकैकसं प्रवेशयेत् ।

द्वौ लिङ्गादग्रतः कुर्यात् चतुष्क नासस्य मण्डपम् ॥69॥

वल्लि लिङ्गचतुष्कं वापि गज लिङ्गाकृतिं तथा ।

हंसकुक्कुटाकृतिं वापि शुकनासं कुरु ॥70॥

द्वौ लिङ्गावर्ध लिङ्गस्य गर्भे वै मध्यमस्य तु ।

द्वौ लिङ्गाकृत मध्ये तौ त्रीणि लिङ्गानि कं न्यसेत् ॥71॥

अथवा सर्वलिङ्गानां यो भागो हारकर्मणि ।

स्थितो वा तेन भागेन प्रासादं परिवर्तयेत् ॥72॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सूत्रेण सुमितं कृत्वा लिङ्गं भाग त्रयं कुरु।

चतुरस्रा मधोभाग मष्टजं मध्य मास्थित:॥73॥

98 A वृत्तं तृतीयकं भागं किञ्चिद्दुन्नत मस्तकम्।

अत ऊर्ध्वं मध्यम मध्य लेन भागं प्रशस्यते॥74॥

पीठ लिङ्ग समा प्रोक्ता पूजाभाग त्रयेण वा।

अन्यथा रचिता लिङ्गात् गर्भान्तं नवधा कुरु॥75॥

मध्य पीठं पदान्यष्टौ स्वांश मात्रादि . . ।

सर्वेषामेव भागानां परिणाहस्तु कीर्तित:॥76॥

ब्रह्मांशस्तु त्रयो भाग वृत्तं षोडश संयुतम्।

शांतं कुण्डितं क्षेत्रं परिणाहस्तु कीर्तित:॥77॥

मस्तकं यस्य लिङ्गस्य येनांशेन तु वर्तयेत्।

तत्रभागं पुनस्तस्या यामे परिकल्पयेत्॥78॥

ब्रह्म वेदां न्यसेद्भाग द्वितीये पीठिका स्थिता:। अंशं भागं तृतीयकन्तु कर्तव्यं लक्षणान्वितम्

ऊर्ध्वं तृतीयकं भागं (यस्य लक्षण मुद्धरेत्।

सूत्र यित्वा सुवर्णेन तल्लिङ्गाकृति मुत् जिरेत॥80॥

अष्टांशं मुद्धयत इच्छा ~~ऊर्ध्वं तृतीयकं भागं~~। ऊर्ध्वं बाहुभि: समलंकृतम्।

उत्कीर्य मधुना ऽयेन पश्चात् पुन लेपयेत्॥81॥

द्विसूत्र कान्तरिते सूत्रं तस्य मध्ये पुनर्नयेत्।

मध्यमं गुलिमानेन तरङ्गं लक्षणं स्मृत:॥82॥

अथ लक्षण यथा लिङ्गं हीन लक्षणमेव वा।

अति दीर्घ कृशं ह्रस्वं नाधमं यत्र देवता:॥83॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मात्सर्वप्रयत्नेन प्रा द्वारे लक्षणं स्मृतम्।

९८ B ४ लक्षणं नेत्रसंज्ञितं सुप्रमाणं सुदर्शनः ॥८५॥

सर्वदोषविनिर्मुक्ताः नेदं कुर्यात्तु लक्षणः।

यथा लिंगं तथा चैषा स्थापनीया प्रयत्नतः ॥८६

दीर्घमायुः क्षयात्कुर्यात् क्षेत्रं ह्रस्वं तथा धनः।

(क्ष)

तस्माद्ध्रस्वतरं लिङ्गं नातिदीर्घं तु कारयेत् ॥८६॥

महता हारेण - - - संयतेन जितात्मना।

आचार्येण प्रशान्तेन सततं मन्त्रजापिना ॥८

लिङ्गं वेदीकृतश्चैव शिल्पिना दीयता भवेत्।

गोयुतारथमारभ्य मानयीत तदा शुचिः ॥८८॥

गन्धपुष्पैरलंकृत्य धूपं दत्वा विधानवित्।

पुरः प्रदक्षिणीकृत्य नाना घोषैः प्रवेशयेत् ॥८९॥

नीत्वा चायतनं दिव्यं ईशानीं दिशमाश्रितः।

मृदुशय्यासनं स्थाप्य नैकरात्रं निवापयेत् ॥९०॥

दि

तत्राधिवासनं कुर्यादाचार्यः सुसमाहितः।

होमं कृत्वा विधानोक्तं जपेद्ब्रह्मादिसंहिताः ॥९१॥

(नै)

ततो मूर्तिधराञ्छौ सकलीकृतविग्रहान्।

जपध्यानरतान्शान्तान् अर्धरात्रे प्रबोधयेत् ॥९२॥

उत्तिष्ठन्त्विति विप्रेन्द्र कलशान्वारिपूरितान्।

मन्त्रसंघसमायुक्तान् संपादयथ नेपरान् ॥९३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततो लिंगं समुत्थाप्य तत्र जप्तेन वारिणा।
स्नापयेदस्त्रपूतेन शीतेनाप्युत्तरेण वा ॥ ९५
९१ A धारणा निश्चलं सेशोद्य लिंगं वेदिं तथाप्यथ।
संस्नाप्य वासोभिर्नवैर्वेष्टयित्वा प्रवेशयेत् ॥ ९६ ॥
चतुरस्रां शिलां कृत्वा त्र्यंगुलाधारमेखलाः
चतुरस्रां लिङ्गस्य सम सूत्रेण सूत्रितान् ॥ ९६ ॥
सुदृढां निस्तृणां शुद्धां द्वादशांगुलमुच्छ्रितान्
सहोमां निहितां स्निग्धां सुस्थिरां सम सूत्रितान् ॥ ९७ ॥
संप्रोक्ष्य यतनं मन्त्री मन्त्रपूतेन वारिणा।
ब्रह्ममध्ये शिलां न्यस्य निधानं तत: कुरु ॥ ९८ ॥
सौवर्णं तादृशीं कृत्वा कूर्मं पृष्ठे निधापयेत्।
धातवः सर्वबीजानि रत्नानि च पुन: क्रमात् ॥ ९९ ॥
तत: शिलां प्रतिष्ठाप्य तस्या मध्ये यथा विधि।
तत्र शक्तिं न्यसेच्छ्रीमान् (शिवात्) अंकुरांकुरसंनिभान् ॥ १०० ॥
हरितालं तु पूर्वेण दक्षिणे दद्यात् तु मनःशिलान्।
पश्चिमे अञ्जनं दद्यात् नैरृत्ये हेम माक्षिकान् ॥ १०१ ॥
विमलकं तु वारुण्यां वायव्यां पारदं न्यसेत्।
कासीसमुत्तरे दद्यात् ऐशान्यां रोचनां न्यसेत् ॥ १०२ ॥
गैरिकाला विधातव्या ब्रह्मस्थाने विचक्षणैः।
पवित्रा सर्वमङ्गल्या ज्ञेयाः पुष्टिकराः स्मृताः ॥ १०३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्रीहींश्च गर्ज बाष्टं ऐशे न्द्रा दिशि नियोजयेत् ।

माषांश्चैव कुलुत्थांश्चाग्नेय्यां दिशि योजयेत् ॥१०५॥

मुद्गांश्च चणकांश्चैव याम्यायां तु नियोजयेत् ॥

तिलान् कृष्णातिलांश्चैव नैरृत्यां दिशि योजयेत् ॥

९९ B गोधूमांश्च यवांश्चैव वारुण्यां दिशि योजयेत् ।

प्रियंगवश्च श्यामाकान् सौम्यायां दिशि योजयेत् ॥१०६

ऐशान्यां सर्वधान्यानि दद्यात् पुष्टिकराणि तु ।

मातवः सर्वबीजानि ब्रह्मस्थाने नियोजयेत् ॥१०७॥

ज्ञयोपि पूर्वतो व्रीहि निष्पावं दक्षिणेन तु ।

पश्चिमेन यवान् दद्यात् उत्तरेण प्रियंगवः ॥१०८॥

बीजगाढं न कुर्वीत मंगलार्थं नियोजयेत् ।

विपरीतानि बीजानि यदा लिङ्गस्य पादयेत् ॥१०९॥

ततो दोषा निवर्तन्ते व्या(वा)पश्चजयानि च ।

ऐन्द्रां तु पादयेद्वज्रं सूर्यकान्तं तु व... तः ॥११०॥

इन्द्रनीलं तु याम्यायां वैडूर्यं नैरृते दिशि ।

शंखश्चैव तु वारुण्यां वायव्यां पद्मरागकम् ॥१११॥

मरतकं तु कौबेर्यां मैत्र्यां मौक्तिकं न्यसेत् ।

ब्रह्मस्थाने ब्रह्ममणिं वासुकेरमृतं मणिम् ॥११२॥

लोतास्रो यत साधयानां विश्वभयः पुलको मणिः ।

सौम्ये शानयो मध्ये चन्द्रकान्तु प्रपादयेत् ॥११३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अलाभात् सर्वधातूनां हरितालं तु दापयेत् ॥

अलाभात् सर्वबीजानां धान्यबीजं प्रदापयेत् ॥१०४॥

अलाभात्सर्वरत्नानां वज्रं हेमं तु दापयेत् ।

अलाभात्सर्वलोहानां स्वर्णं हेमं तु दापयेत् ॥१०५॥

यथास्थानेषु तैर्वेतैर्विधिं प्राप्नोति पुष्कलम् ।

किञ्जिल्कापुष्पधूपाणि स्वभूते नियोजयेत् ॥१०६॥

100 A धूपं दत्वा पुनश्चैव पश्चाल्लिङ्गं तु स्थापयेत् ।

महयावलंबनं कृत्वा तेनसूत्रेण तत्त्ववित् ॥१०७॥

निश्शब्दं निश्चलं शान्तं स्थितं लिङ्गं स चालयेत् ।

नमः सर्वात्मकायेति लिखेवाचाः वायसेन तु ॥ ? १०८॥

(२)?

पीतवर्णा मतो भागे चतुर्थो पितामहम् ।

अतसीपुष्पसंकाशो मध्येतु पुरुषोत्तमम् ॥१०९॥

ऊर्ध्वभागे स्थले रुद्रं शुद्धकुन्देन्दुसन्निभम् ।

तत्रैव देवतास्सर्वा अर्चाभागसमाश्रिताः ॥११०॥

यस्माच्च मैश्वरं तेजः सर्वदेवमयं च तत् ।

पिण्डभूतं च तत्त्वानां ततो ज्ञो लिङ्गमुच्यते ॥१११॥

शम्भुं भूतं विजानीयात् शुद्धकाञ्चनसन्निभम् ।

गणमातां लिकां पुष्या धात्री योगीश्वरी पुरा ॥22॥

धर्मादि चरणं स्थाप्य ततः पीठं नियोजयेत् ।

प्रणवेन विधानज्ञो अर्चाख्ये पूर्वचोदितम् ॥23॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रणवं सर्वदेवत्यं विद्येशं परमात्मनः ।

सान्निध्ये देवतारूपं यावत्कालमिति तद्भवेत् ॥१२४॥

ऐन्द्रे वारुणे कौबेरे ऐशे स्वस्थेऽस्यां दिशि वायवे ।

स्थापितं रूपमेतैर्लिङ्गं तत्प्रमाणं तत्र कारयेत् ॥१२५॥

सा गणदेवता यावत् यत्नात्कृतलक्षणाः ।

होमं कुर्यात्तु तत्रैव यथाज्ञानं पूजनं ततः ॥१२६॥

ततस्तु देवदेवेशं शिवं परमकारणम् ।

पूर्वोक्तेन विधानेन लिङ्गे तं संप्रपूजयेत् ॥१२७॥

पूजां गृह्णाति लिङ्गस्थो बाह्यस्थो नापरो हि नः ।

100 B आचार्यमूर्तिमास्थाय शिवो ज्ञानं प्रयच्छति ॥१२८॥

आचार्यस्यापि मन्त्रस्य शिवज्ञानं शिवत्वं च ।

नानात्वं नैव कुर्वीत विद्याविद्येश्वरादयः ॥१२९॥

शिवज्ञानसमायुक्ता आचार्या मन्त्रविग्रहाः ।

सर्वमूर्तिधरो नित्यं शिवमन्त्रं प्रपूजयेत् ॥१३०॥

लोकेशान् सकलान् भक्तितान् ।

अस्त्रं चैव तु पीठस्याः पूजयीत यथाक्रमम् ॥१३१॥

गणेशान् लिङ्गमध्यगान्

विद्येश्वरान्तु पृष्ठन्तु चक्रवत्परिसंस्थितान् ॥

ऊर्ध्वाधश्च स्थितान् संलीनान् पूजयित्वा विधानवित् ॥१३२॥

शक्तिस्थं ब्रह्मनिर्युक्तं शिलाङ्गैः परिपूरितम् ।

शिवं विश्वेश्वरं देवं लिङ्गमूर्ध्वमिति पूजयेत् ॥१३३॥

लिङ्गं प्रक्षाल्य शास्त्रेण शिवास्त्रं यत्प्रकीर्तितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रुद्रस्नान ध्रुं विघ्ना तेन प्रोत्सारितास्तु ते ।

पीठं प्रक्षाल्य पश्चात् वर्धन्या तु स्वकेन तु ॥

पाशुपतेन शस्त्रेण अस्त्रस्य धारा हता: ॥

एवं प्रोत्सारणं कृत्वा विघ्नानां विविधं बुधः ।

ततोऽर्चनं प्रकुर्वीत शिवस्य परमात्मनः ॥ 136 ॥

अर्घं दत्त्वा विधानेन यथा पूजां विसर्जयेत् ।

अभ्यर्च्य पञ्चभिर्द्रव्यैः स्थण्डिलाय निवेदयेत् ॥ 137 ॥

(ख) A कृत्वा चण्डेश्वरायेति हुं फट् स्वाहेत्यनुक्रमात् ।

करणं दीक्षणं चैव निर्माल्यं सततं बुधः ॥ 138 ॥

वा महास्त्रेण मन्त्रेण स्रुवं गृह्य विचक्षणः । (जं)

नत्वाथ मस्तके लिङ्गं कृत्वा तिष्ठेत साधकः ॥ 139 ॥

न चास्य जायते यद्वस्तु कुपरिष्टात् कदाचन ।

(या)

तर्जन्योत्तर्जयेद्विघ्नान् सान्निध्ये लिङ्गमुद्रया ॥ 140 ॥

निरोधे निष्ठुरां कुर्यात् स्नानकाले विचक्षणः ।

सम्प्रक्षाल्य करौ मन्त्री स्पृष्ट्वा लिङ्गं पुनः पुनः ॥ 141 ॥

सन्तोषं स्नापयेल्लिङ्गं स्नानमूर्ध्वं समाचरेत् ॥

॥ इति श्री सर्वज्ञानोत्तरे प्रतिष्ठा प्रकरणम् ॥ ॥

गन्धे क्षीणे चला लिङ्गे वर्तमानं तु कारयेत् ।

चालं दत्त्वा तु तत्स्थानात् प्रशस्तदेशे निधापयेत् ॥ १ ॥

शैले निलये शैलं दारवे दारवं तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मृण्मये मृण्मयं चैव रत्ने रत्नं नियोजयेत्॥

सुवर्णेन तु संधाय घृतेन मधुना सह।

पूर्वोक्तेन विधानेन प्रयत्नेन तु स्थापयेत्॥३॥

छिन्नं तु तेन यत्नेन विच्छिन्नो विधि सत्तमः।

स्फोटो भग्न शिराश्चापश्च आकारे नि विगर्हितम्॥४॥

अत्युच्चं वा प्रमाणस्थं विवर्णस्थं स्वनं कुरु।

निम्नस्तं वा दृढं तं कुर्यात् द्वारार्धे न व्यति क्रमेत्॥५॥

न चैव वेधनं कुर्यात् रन्ध्रे शस्त्रं प्रपूरयेत्।

101 B आस्यं वा पादिनं वापि सूत्र मेकं परित्यजेत्॥६॥

अथ वाह्यात् क्रमे सूत्र मीशानं सर्व कारकम्।

(शा)
वा सूत्रौ तं विधि मुख्यस्य मोक्षयुक्तोऽपि मानवः॥७॥

(चा)
सुस्थितं तु स्थितं वापि शिवलिंगं न चालयेत्।
शाठ्यो यदिष्ट मार्गेण दृ... नाकृतिभिः क्रमात्॥८॥
(तु हरे ह्यापि पूर्व.. सूत्रेण मन्त्रवित्॥९॥
शतेन स्थापयेल्लिङ्गं सहस्रेण तु चालयेत्।)
अत्राम्बु पञ्चगव्येन कारणानि विशोधयेत्।
दधि क्षीर घृतैः स्नाप्य ततो लिंगं विसर्जयेत्॥१०॥
यव गोधूम चूर्णैः कणा गौ गन्ध शालिभिः॥११॥

(कु)?
वेत्तु भिश्च विविधैर्भक्ष्यैः क्षीरवृक्ष समुद्भवैः॥ ॥ ॥

आज्यैः क्षीर कुशाग्रैश्च मधुक्षत तिलैः सह।

यवैः सिद्धार्थकैर्युक्तं पञ्चापदर्यं प्रदापयेत्॥१२॥

ततो गन्धैश्च पुष्पैश्च धूप वस्त्र विभूषणैः।

भक्ष्य भोज्यान्न पानादि संपूज्येत बिन्दु मीश्वरम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथारूपं विशेषस्था तन्मार्गं तत्र चिन्तयेत् ।

शक्तियुक्तं परं देव मया श्रुतं षडानन ॥

यो योवासौ सदा देव सर्वदः सर्वकामिकः ।

सर्वज्ञः (स) सर्वगश्शान्तो युक्तो मुक्तो निरामयः ॥ 15 ॥

युक्तानि शक्तिमन्त्रेण सर्वरूपाणि षण्मुख ।

102 A मध्यस्थानि तु जांति हृत्स्थानात् सर्वत्र योजयेत् ॥ 16 ॥

शिरस्थाने तु देवस्य यथार्थो होममाचरेत् ।

शिवस्य शिवमन्त्रेण सहस्रं परिसंख्यया ॥ 17 ॥

ब्रह्माङ्गैश्च शिवाङ्गैश्च यथास्थाने यथाक्रमात् ।

तस्याधिष्ठन बाहिः पश्चात् मूर्तिहोमं समाचरेत् ॥ 18 ॥

विघ्नेश्वर (२) गणौ नन्दौ लोकपालस्तथैव च ।

यथास्थानेषु पद्माङ्गैः मूर्तिहोमं परः स्मृतः ॥ 19 ॥

अथवा सर्वमन्त्राणां यथापूर्वमुदाहृतम् ।

शिवस्य शिवयागे तु तथाङ्गौ तर्पयेत्सदा ॥ 20 ॥

पृथक् पृथक् पदास्कन्द ध्या जपदेवताः ।

तथा पद्मौ संयुक्ताः स्वमन्त्राभिविकल्पिताः ॥ 21 ॥

अथाग्रजं च मह्ये (शा) गात लिङ्गे गणौ स्थण्डिले शिवौ ।

तदेकमन्त्र मन्त्रास्तु द्वयेया सर्वाङ्गयुताः ॥ 22 ॥

ज्ञाननिष्ठा यथा ध्यायं ततो दशादिशाबलिम् ।

दृष्ट्वा चण्डेश्वरं देवा गन्धं च संप्रपूजयेत् ॥ 23 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गन्धो पुष्पप्रविञ्यैः वस्त्रालंकार वाहनैः।

ग्रामखेटपुरेवापि यथा विभव विस्तरैः॥ 24

विनाशाद्भीत कुर्वीत महापुण्य जिगीषया।

सर्वकामानवाप्नोति यथोक्तेन कर्मणा॥ 25

सर्वयज्ञतपोदान सर्वतीर्थेषु यत्फलम्।

तत्फलं कोटिगुणितं स्थापयेल्लिंगं लभेन्नरः॥ 26

102 B यो लिङ्गं स्थापयेदेवं विधिपूर्वं सदक्षिणं।

सर्वागमोदितं पुण्यं कोटिकोटिगुणं लभेत्॥ 27

पितृजं मातृजं वापि यत्कृतं त्रिजन्मनि।

कुलैकविंशमुद्धार्य ततो गच्छेत् परां गतिम्॥ 28

अज्ञात्वा विधिवच्छास्त्रं कुरुते यस्तु लोभतः।

कर्तारं च तथाचार्यं इहामुत्र विनाशयेत्॥ 29

तस्मात्सर्वप्रयत्नेन विधिवत्कारयेद्बुधः।

कर्ता कारयिता चैव ततो याति परां गतिम्॥ 30

॥इतिश्री सर्वज्ञानोत्तरे जीर्णोद्धार प्रकरणम्॥

= .x. =

चालयेन्मानवेषु लिङ्गेषु विधिरेकं प्रकीर्तितः।

अचलेषु समारम्भो हि तत्वतः प्रतिमासु च॥1॥

अतत्त्वज्ञै... र्वा लिंगं स्थापितं तु दाम्भवैः

स्वयम्पद्या (या) वा देवाद्यैन तस्य वाको विधिः स्मृतः॥2॥

सौवर्णं राजतं ताम्रं कांस्यं वा शैलमृण्मयम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सपीठं निर्मितं लिङ्गं ध्रुवं च यदचलं भवेत् ॥ 3

अस्त्राम्बु पञ्चगव्येन धारणादिभि र्विशोधयेत्।

स्थापये सर्व बीजैस्तु प्लुतै र्बिन्दु विभूषणैः ॥ 4

ध्यानेन देवतापीठं यात्, बीजं स्मरन् क्रमम्।

पूर्वोक्तेन विधानेन प्रणवेन तु संस्मरेत् ॥ 5

इन्द्रश्च पावकश्चैव यम [illegible] च।

जल वायु कुबेरेश ब्रह्मा नन्द्योश्च देवताः ॥ 6 ॥

103 A पृथिव्यादीनि गन्धान्तं ब्रह्म वेद्यां प्रकल्पयेत्।

धारिका मूर्ध्नि वेद्यां तु धर्मादि चरणान्न्यसेत् ॥ 7 ॥

तानि चैव निबध्नाति गुणौ स्त्रयोऽथ वर्तिनः।

चतस्रो गात्रकां कृत्वा रागाद्यं वरणादिषु ॥ 8 ॥

अधोर्ध्वे छन्दनं कृत्वा मायां विद्यां प्रकल्पयेत्।

वा वा लिङ्गं तु तन्मध्ये शिवान्तं वा विचिन्तयेत् ॥ 9 ॥

विशुद्ध स्फटिक निर्भासं सूर्यकोटि समप्रभम्।

आधारं सर्व देवानां भक्ति मुक्ति फलप्रदम् ॥

(चो)

तस्य मूर्ध्नि स्थितं पद्मं तल्लीनं तारु कर्णिकम् ॥ ॥

चारु केसर पर्यन्तं अष्टपत्रं मनोरमम्।

लिङ्गं नवं सदाकलाख्यं ततः संस्थापयेच्छिवम् ॥ 12 ॥

पूर्वोक्तेन विधानेन पूजयेच्च यथाक्रमम्।

स्वाहा स्वधा वषट्कारैः वषट्कारेण चैव हि ॥ 13 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जी
अभ्यर्च्य संप्रयुञ्जीत नेत्र वस्त्राणि चैव हि।

अभ्यर्च्य संप्रयुञ्जीत धूपं जाप्यादिभिः क्रमात् ॥१५॥

आविनस्य स्था... वि देवस्य गन्ध पुष्प पवित्रकैः।

वस्त्रेष्वर्घ्यपात्रेषु नमस्कारो विधीयते ॥१६॥

सर्वलिङ्गे स्वयंस्कन्द विधिरत्र समासतः।

प्रयत्नेन तु कर्तव्यः प्रतिमासु निबोध मे॥

प्रतिमां लक्षणोपेतां विचित्र लेख्यां तथेतराम्।

यादृशं देवतारूपं तादृग्रूपं तु कारयेत् ॥१७॥

103 B अस्त्राम्बुपञ्च गव्याद्यैः स्नानं पूर्ववदाचरेत्।

तथा च भूतसंशुद्धिं धारणाभिः समाचरेत् ॥१८॥

सौम्येन देवता स्थाप्य प्रधानेन षडानन।

ततोऽङ्गानि नियुञ्जीत नेत्र वस्त्राणि चैव हि ॥१९॥

संचिन्त्य देवतारूपं रुद्रभाव.. व लक्षणम्।

प्रसन्न वदनं सौम्यं सर्वालङ्कार भूषितम् ॥२०॥

हृदा तु गन्धपुष्पाणि वस्त्राभरणानि च।

धूपोपहार रूपाणि दीपानि स्वकीयेन नियोजयेत् ॥२१॥

हेमरत्नेषु रूप्येषु ताम्रशैलमयेषु च।

दारवेषु च सर्वेषु सदा स्नानं विधीयते ॥२२॥

चित्र लेख्येषु चैषां तु स्नानं वस्त्रेषु कारयेत्।

पाद्याचमनकं चार्घ्यं सर्वं ध्यानेन संस्मरेत् ॥२३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

केवलं मन्त्रविन्यास मुक्तं पुष्पैर्विनिः कृतिः।

कृत्वा धूपं प्रयुञ्जीत नैवेद्यं चोपकल्पयेत्॥ 24

गन्धैः पुष्पैस्तथा धूपैस्तद्गृहं परिवासयेत्।

वस्त्रैश्चैव पुनः कृत्वा चित्रवर्णैर्वराम्बरैः॥१५॥ 25

तोरणैश्च ध्वजैश्छत्रैः पताकैश्चारुदर्पणैः।

रत्नानि रत्नकानि रचित्वा देवतां यजेत्॥१६॥ 26

ततो होमं प्रकुर्वीत पुरस्तात् संयतेन्द्रियः।

स्थापिता देवता यातु तस्या मन्त्रैस्तु पूर्ववत्॥१७॥ 27

स्थापने सर्वदेवानां पुरस्ताद्धोममाचरेत्।

सततं अग्निकार्ये तु अगारं पृथगेववत्॥१८॥ 28

104 A प्रति देवं प्रतिष्ठायां . . . . . . ॥

॥ इति सर्वज्ञानोत्तरे प्रतिमादि प्रकरणम्॥

— x —

पुनरेवं प्रवक्ष्यामि जपस्य विधिनिर्णयम्।

यथा च विन्दते कालं मात्रायाम विसर्जनम्॥१॥

जपाद्दशांशतो होमो जपान्ते दश लाक्षिकः।

कोटिः कल्पेदितावत्स उत्तमा सिद्धिसाधने॥२॥

मध्यमस्य तु पञ्चा स्यात् कन्यसे पञ्चविंशतिः।

सर्वाणि क्षुद्रकर्माणि तस्यार्धेन तु कारयेत्॥३॥

दीर्घकं टकिनो वृक्षा निंब तिन्दुक बिभीतकाः।

शाशाक श्लेष्मातकाश्चैव विज्ञेया क्रूरकर्माणि॥४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्रिशिखा गा स्फुटिता वक्रा वक्रच्छेदा सतिक्रिय:।
विषा प्रकाटकैर्लीना: प्रयोज्या: क्रूरकर्मणि ॥ 5
उत्ताश्मस्वलक्षणा स्कन्ध क्षीरवृक्षसमुद्भवा:।
शान्तिकर्मणि विज्ञेया स्थपत्ना वा कण्टवृक्षजा: ॥ 6
लता पल्लव गहनस्था गन्धहीना: समत्वच:।
नीरसा निर्व्रणा रसान्ते क्रूरे भवन्ति लोहिका: ॥ 7
विलया गालदा कुण्ड विज्ञेया: क्रूरकर्मसु।
समा: शान्तिके कर्मे पौष्टिके च वदानन ॥ 8 ॥
साधारण सर्वसंसिद्धिं नित्यहोमात् प्रवर्तते।
जपेन पापजं दुष्टं ज्ञानध्यानात् प्रमुच्यते ॥ 9 ॥
विशिष्टजनसं पादो नरेन्द्र जन वन्दनम्।
104 B आरोग्यं बलं चैव यदिच्छा सिध्यते ध्रुवम् ॥ 10 ॥
दिव्यान्तरिक्ष भौमानि सिद्धलिङ्गानि पश्यति।
अथ वा मन्तरे वाचं कृत्वा कृष्णाणि संहरेत् ॥ 11 ॥
पूर्व लोहादि लोहानि रसं योपरसानि च।
उपधातुं जता दीनि अरितालं मन:शिलाम् ॥ 12 ॥
आरि नगा हतं लोहं घृत मद्यानि जेवयेत्।
न हि रसे पञ्च गन्धतोत: कार्या करा कुचम् ॥ 13 ॥
रसं योपरसं चैव पीत सूर्येण शोधयेत्।
होमान्त रादि रुण्डलानां शोधनं पूर्वचोदितम् ॥ 14 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यस्त्वेवं शोधितं ग्रन्थि मूल तन्त्रैः प्रकीर्तितम्।
एवं तन्त्रे तथा ज्ञेय स्तत्त्वं नैव विशोधयेत्॥
अथ सूत्र विधानेन ग्रन्थालेपन मालभेत्।
कथितं त्रिपुरा वल्ले त्रि विधा ग्रन्थ साधनम्॥
उत्तमं मध्यमं चैव कन्यसं च यथा क्रमम्।
सात्विकं राजसं चैव तामसं चेति तत्स्मृतम्॥१७॥
ज्वलन्तं सात्विकं विद्यात् सधूमं राजसं स्मृतम्।
सोष्मं वै तामसं विद्यात् .. एवं ग्रन्थि विनिर्णयः॥१८॥
अतिष्ठं ज्वलमानेन सधूमेन सुरांगना।
सोष्माणो इष्यतां याति इति तन्त्रि विधा गतिः॥१९॥
बीजमन्त्रं तथा ध्यान मानोमन [illegible] विधानवित्।
बिन्दु मध्यगतं कुर्या [illegible] तथा विशिष्ट विग्रहम्॥२०॥
105 A एवं एवा यन्त्रं रोगी गाणिक्यं जन पादुके।
जन कृत नि विद्यन्ते हरिताल मनःशिले॥२१॥
बिन्दुनाद मयोर्यो यो म गीयो यदा जपति जपकुरव।
तदा इह सर्व कार्याणि संसाधयति नान्यथा॥२२॥
सितः शान्तिकरो ज्ञेयः पीतः पौष्टिक कर्मणि।
हिरण्य वन्मारणे प्रोक्ता व्याधयो ध्यानते स्मृतः॥
कौं कं कापक संकाशो . . . वशीकरण कर्मणि।
सिद्धे वर्णो प्रयुंजीत धूम वर्णो निलापकः॥२४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इन्द्रायुधसमाकारं तथैवाकर्षणो मतम् ।

सर्वावर्णात्मको बिन्दुः सर्वकर्मकरः स्मृतः ॥२५

भ्रुवोर्मध्यगतं चैव बद्धच्छन्दतेन यो ।

शुद्धस्फटिकसंकाशं पश्यते करणेन तु ॥२६॥

निश्वासो श्वासयोगेन देहिनां देहसंस्थितः ॥

उदितो भास्करो भूत्वा सोमश्चैव कलात्मकः ॥२७॥

स एव कालो नास्त्यन्तो यानेन सर्वं प्रतिष्ठितम् ।

विशते च पुनस्तानेन तस्माच्चैव प्रवर्तते ॥२८॥

दक्षिणे प्राणवृत्तिस्तु ... स्युनारभ्याति देहिनाम् ।

उत्तरेण तथैवेह ... यच्च पुनरीश्वरम् ॥२९॥

नैराश्यक महो ... न्त्यां ज्ञेया नैराश्यकाम् ।

आदौ ... तथा ... हे ... नाहाय वाडिकम् ॥ डि

अ... द्वर्ष ... मौ यदा चरति भास्करः ।

105 B तदा होराशंक्रि मृत्युं पुनरारभ्यादि देहिनाम् ॥

मृत्युमेवं विधं दृष्ट्वा यदि जीवितुमिच्छति ।

तदासौ सौम्य नाथस्थं तमेव परिचिन्तयेत् ॥३२॥

शुद्धकुन्देन्दुवर्णाभां शङ्खगोक्षीरसप्रभम् ।

अमृतोसन्मात्मानं तन्मध्ये तन्मयं गृह ॥३३॥

अनन्तावर्णपूर्वं माऽमृता परिकीर्तिताः

(मे) (वे)

तामेव धारयेन्नित्यं न मृत्युपशगो जायते ॥३४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दूर्वां त्रिपञ्चरन्ध्रां वा अमृतांशं गुल्फालयां।

जुहुयात् त्रिपञ्चरन्ध्रां वा पूर्णेन विविशते ॥३५॥

अथ निर्वेदमायाति जीवितेनाक्षरे जले।

कालाग्निं तदा देवं मृत्युरूपं विचिन्तयेत् ॥३६॥

वह्निना मूर्तिसंभिन्नं सुषुम्ना मध्यसंस्थितम्।

ज्वलज्ज्वलनसंकाशं दीप्ततेज शिरसाञ्चितम् ॥३७॥

उत्क्रम्य मूर्ध्नि शब्देन प्राणास्तत्क्षणतां नयेत्।

कालाज्ञ... सदाभ्यास मनसा निश्चलेन्द्रियः ॥३८॥

निरुध्य स्पन्दनौ सम्यक् सर्वद्वाराणि चैव हि।

सत्ताख्या वायुवेगेन सुषुम्नास्त्रेण मूर्धनि ॥३९॥

अ... शाभावनायुक्तो बिन्दुनादमयं स्मरेत्।

एवं बिन्दुच्यते प्राणैः तावन्नैव प्रक्री... ते ॥४०॥

बिन्दुनादौ द्विकं सर्वं स्थूलसूक्ष्म ... ।

तस्माद्बिन्दुमुपासीत शाक्तिजारस ... ॥४१॥

106A यथा तु चित्तसम्पन्नइयस्य तं भवेत्।

विशन्ति चरे द्विजाः कपालवान्कोटिपर्ये ॥४२॥

॥ इति सर्वज्ञानोत्तरे सिद्धिसाधकादि प्रकरणम् ॥

अतः परं प्रवक्ष्यामि भिक्षाचर्याविधिक्रमम्।

भोजनं शयनं शौचं स्नानामल जपाक्रमम् ॥१॥

हृदिना गडलं कुर्यात् योगस्य सततं बुधः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रक्षाल्य यित्वास्त्रबीजेन कवचेन तु वेष्टयेत्॥

ईशानं चिन्तयेत् मध्ये गायत्र्या सत्रं मन्त्रवित्।

अस्त्रं तु जपता विद्यं शिष्या भावयेच्चतुर्थी: ॥३॥

अस्त्र खण्डे तु विन्यस्य क्षेत्र गायत्रीमव तु।

ततो शिष्यां मटे चिन्त्यं पतितां शस्त्रवर्जिताम्॥४॥

आग्नेये तत्पुनः पात्रं रुद्रादि स्थाने निधापयेत्।

संगृह्य मृत्तिकां भूमौ जंघा शौचं तु कारयेत्॥५॥

आचम्योद्धृत्य पूतात्मा पुनरभ्युक्षयेच्च सम्।

शोधयित्वा विधानेन देवान्यो [illegible] कल्पयेत्॥६॥

अथ प्राणाहुतिं दत्वा शिवहोमं पुनः क्रमात्।

स्त्रियः [illegible] भुञ्जीत [illegible] शीतलं निशि॥७॥

आचम्य बहिः निष्क्रान्तो जपयेद्वं तथा वनः।

उद्धृत्य पुनराचम्य ‥ यीत विधिना ततः॥८॥

त्रिहस्तोत्खात भूशय्ये रुद्राये रुद्रं महीतले।

सर्वलक्षणसंपूर्णो पुनराकृत्वा जपालयम्॥९॥

% B वितानध्वजसंयुक्तं पताकैरपशोभितम्।

सद्भावतार क्रीडायैः लिङ्ग [illegible] विभूषितम्॥१०॥

नवैकादश हस्तं वा लघुहस्तं यथाविधि।

प्रागुत्कल्पकं कुर्या [illegible] यं न जपा बुधः॥११॥

पञ्चरंगित सूत्रेण [illegible] लब्धो ‥ मन्त्रवित्।

द्वार देशादारभ्य वेष्टयेत्ति गुणेन तु॥१२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इति मात्रां स्मृतः कीलो नश्चौ दिग्देवता न्वितान्।

अंगान् स्व स्थान विन्यस्य(धी) न्पूजयित्वा यथा क्रमात् ॥१३॥

चतुरः कलशान् पूर्णान् विदिशासु निवेशयेत् ॥

शिव स्थाने यजेत्कुम्भं प ··· ध्यानेनवो गुह ॥१४॥

दीप्तनेत्रो त्रिल प्रस्यं दंष्ट्रो करद भयानकम्।

शरस्त्रो स्वत करं घोरं सर्व विघ्न विनाशनम् ॥१५॥

ततः शक्तिं न्यसेत्कुम्भौ विद्यां तत्रो परिन्यसेत्।

स्वरसंकं ततो दद्यो कुर्णानि च यथा क्रमम् ॥१६॥

पूर्व(वे) मन्त्र देहस्तु प्राकारास्त्रैः सु गोपितम्।

शयीत मनसा योगी शिवं पश्यत्सतं ततः ॥१७॥

तमेव जपतो नित्यं ध्यान माश्रित्य मन्त्रवित्।

अर्द्ध रात्रे तु, लवने तथैव समनु पालये(त्) ॥१८॥

शयन चेतसा ज्ञेय प्रबुद्धस्य तथा जपः।

गतिं देवस्य विज्ञाय जप ध्यानादिकं क्रमात् ॥१९॥

प्रहरार्धे ततो त्यास ध्यात्वा देवं पिनाकिनम्।

मनसा वर्तयेत्तं तु, प्रणवं बिन्दु वर्जितम् ॥२०॥

(स्ये)
निर्गस्य शयन स्थानात् अ.वश्य. कारणं कुरु।

बहिरंगोपवीती च दृष्टि पूत पद क्रमी ॥२१॥

दिवैवोद· मुखाविष्ठे ध्यात्रो वै दक्षिण मुखः।

अर्द्धरात्रे तु, नैरृत्ये दुं लक्ष्ये तु, यथा दिवा ॥२२॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

काष्ठं तृणोपलं लोष्ठं वर्जितं ध्यानं जडानन।

ततो मलं प्रकुर्वीत वस्त्रतिरस्यावकुण्ठितः ॥२३॥

न नद्यां कुर्यान्न भस्मनि न गोमये।

न गुल्मे शाड्वले प्रकृष्टे शालोपवनेषु वै ॥२४॥

(दाला)?

काष्ठेन पालैरामृश्य पांशु लोष्ठेन वा गुहे।

गृहीत शिश्नो उत्थाय तु मृत्तिका करणं कुरु ॥२५॥

(द्वे)?

वाल्मीका पर संवर्ज्य [illegible] मूलं जलाशये।

वल्मीक मृत्तिकां चैव तथावै ग्रामयानिकाम् ॥२६॥

विशुद्धं मृत्तिकां गृह्य जलतीरे निधापयेत्।

ततः शौचं प्रकुर्वीत मृत्तिकां गृह्य वारिणाम् ॥२७॥

लिङ्गे गौणि गुदे सप्त सरौक्त करे स्मृतः।

उभयोः सप्त तावत्त्यो मृत्तिका शुद्धि निश्चिता ॥२८॥

(शौ)?

एकैक मन्तरे गौणि। एव शौचं कृतं भवेत्।

दन्त काष्ठं ततो मन्त्री भक्षये दक्षिणामुगतम् ॥२९॥

आचम्य विधिवत् ध्याये पुनरुद्धृत्य येकमात्।

पश्चाद्योगं ध्यानं यावदभ्युदितो रविः ॥३०॥

(स्ना)?

ततः ज्ञानं प्रकुर्वीत सकृत विमलवारिणि।

(सकृद्)

अथो दर्भं भगवता स्नानं सर्वकाम ... ये ॥३१॥

(ले)

107 B लेपगन्ध विनाशाय वारुणं परिकीर्तितम्।

॥इति श्री सर्वज्ञानोत्तरे लिङ्गचर्यादि प्रकरणम्॥

:x:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथातः संप्रवक्ष्यामि वारुणं स्नानमुत्तमम् ।
पावनं परमं स्कन्द लेपगन्धविनाशनम् ॥१॥
पाणिपादौ पुरः क्षाल्य मृत्तिकां गृह्य वारुणीं ।
उपस्पृश्य शुचिर्भूत्वा शिवं ध्यायेत्स निर्मलम् ॥२॥
अस्त्रेण प्रोक्षणं कुर्यात् मृत्तिकाहरणं कुरु ।
मानयित्वा स्त्रबीजेन हृदयेन तु सं‥(हे)रेत् ॥३॥
जलतीरे निधायैतत् क्षालयित्वा जलाशयम् ।
अस्त्रेण क्षालयेत्पूर्वं स्थापयेद्धृदयेन तु ॥४॥
तेनैवाभ्युक्षणं कुर्यात् ततो भागत्रयं पुनः ।
पूर्वदक्षिणे नैव तथा चैवोत्तरेण तु ॥५॥
अस्त्रजप्तं भवेत्पूर्वं ब्रह्मजप्तं तु दक्षिणम् ।
उत्तरं शिवजप्तं तु प्रकुर्वीत पृथक् पृथक् ॥६॥
अस्त्रजप्तं क्षिपेद्दिक्षु दशस्वपि यथाक्रमम् ।
नाराचास्त्रप्रयोगेण तोयमध्ये पुनः क्षिपेत् ॥७॥
आग्नेयीं धारणां ध्यात्वा पुनरमृतं विचिन्तयेत् ।
शिवजप्तेन भागेन ततोऽभ्यावर्तयेज्जले ॥८॥
शिवतीर्थं भवेदेवं विधिनानेन षण्मुख ।

अत्र ग्रन्थपातः

108
A BLank.

Center for Shaiva Studies, Pondicherry Collection

सर्वज्ञानोत्तर पाठः

108 B. जंघे पादे तथा हस्ते प्रक्षाल्य तु पुनः पुनः ।

(श्रो)

कंठयित्वा ततः स्नात्वा श्रोतात् शिवतीर्थे प्रयत्नतः ॥१॥

चक्रवत्युपचारेण स्नुगव्वा मलकादिभिः ।

कल्कैः शिवगायत्र्या महास्त्रेणाशिवेन च ॥२॥

अभिषेकं प्रकुर्वीत लब्धो पाजन मेव च ।

संहृत्य सकल मन्त्राणि निनादेन विधानवित् ॥३॥

आकृष्यो दित मार्गेण स्थापयीत हृदिस्वके ।

तत आयतनं गच्छेत् पुष्पहस्तो विचक्षणः ॥४॥

यदा तु रोगादिना वारुणस्नानशक्तस्तदा प्रक्षाल्य

पाणी पादौ तु भस्म स्नानं समाचरेत् ॥५॥

॥इति श्री सर्वज्ञानोत्तरे वारुणस्नान प्रकरणम् ॥

109 A भस्मस्नानं प्रवक्ष्यामि संक्षेपान्न तु विस्तरात् ।

सर्वज्ञा... नोक्तं पुण्यं सर्वपापहरं परम् ॥६॥

स्वसंस्थं गोमयं गृह्य स्थाने वा पतितं शुभे ।

अधः परि सन्त्यज्य पञ्चगव्येन मर्दयेत् ॥७॥

विविक्ते निर्जने स्थाने सर्वोपद्रववर्जिते ।

प्रक्ष वर्तिकान् निर्मुक्ते प्रवाते परिशोषयेत् ॥८॥

शुष्कं संहरेत्पात्रे अस्त्रबीजेन प्रोक्षयेत् ।

शिवाग्निं जनयित्वा तु निर्दहेत् तेन वाह्निना ॥९॥

अथ संक्षेपतः स्कन्द आरण्यगोमयं पुनः ।

पञ्चगव्येन संयुक्तं विधानेन तु निर्दहेत् ॥१०॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्याप्यलंकारेणालेप गन्धविवर्जितम्।
(णो) (है)
इष्टापि स्थानं स्मितं इष्टं तदप्येवं पुनर्दृश्ये तु ॥११॥
संहृत्य हृदि मन्त्रेण नवेणाण्डे निधापयेत्।
अस्त्रं तु जपतो मन्त्री सर्वविघ्नविनाशनम् ॥१२॥
अस्त्राभिमन्त्रितं कृत्वा मलस्नानं समाचरेत्।
विधिस्नानं ततः पश्चात् मूर्धन आरभ्य मन्त्रवित् ॥१३॥
अङ्गानि स्वानुपूर्वेण बाहिरङ्गैरनुक्रमात्।
आचमेदकं शिवे नैव पश्चात्कुर्वीत षण्मुख ॥१४॥
उद्धूल्य विधिवत्स्नाङ्गः कौपीनं परिवर्तये... ।
109 B प्रक्षाल्य तु पू(पो) पादौ करौ च पुनराचमेत् ॥१५॥
त्रितत्त्व परिजप्तं तु त्रिः पिबेन्मन्त्रविज्जलम्।
परिमृज्य मुखं शक्त्या त्रिवारं तु यथाक्रमम् ॥१६॥
प्रणवेन ततो विद्वान् शिखा नेत्रादिकं स्पृशेत्।
आचम्य विधिना भूयः पितृ देवांश्च तर्पयेत् ॥१७॥
(संध्यां)
सर्वमन्त्रैः सदा वन्द्यां वन्द शिवो विचक्षणः।
ततो ध्यानं प्रकुर्वीत जपश्च त्रिविधं पुनः ॥१८॥
जपेत् षडक्षरं पुण्यं नित्यं मनोवाक्कायकर्मभिः।
वाचके च मध्यमे चैव प्रासादादि क्रमेण तु ॥१९॥
सर्वेषु वा शिवध्या(वो) नित्यं जपध्यानमुवाचरेत्।
प्राणायामनिरोधेन नैव पापमवाप्नुयात् ॥२०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संहितां वा स्मरे नित्यं त्रिषु कालेषु मन्त्रवित्।
शतमष्टोत्तरं मन्त्री सर्व पाप विशुद्धये ॥ 21 ॥
सर्व विघ्न विनाशार्थं पाशजालस्य चैव हि।
अस्त्राणि चास्त्रजाणि सततं परिवर्तयेत् ॥ 22 ॥
एवं मन्त्रमयो भूत्वा सर्व मन्त्रांस्तु योजयेत्।
संसाधयेद् दृष्ट्वा च मन्त्रान् योगी योगात्मकाद् गुणात् ॥ 23 ॥
... साध्यो यदा मन्त्री मन्त्रसाधनमारभेत्।
... दा यो योगी सिद्धिं कमण्डलुधरः सदा ॥ 24 ॥
॥ श्री सर्वज्ञानोत्तरे अजनस्नान प्रकरणम् ॥

— x —

110 A
अतः परं प्रवक्ष्यामि कमण्डलुधरः सदा ॥ 25 ॥
असहायस्य योगीन्द्र सखायेव कमण्डलुम् ॥
प्रणव लय मार्गं धारणा ज्ञेण च विधानवित् ॥ 26 ॥
प्रातः स्नाय तं नित्यं देहे देव कमण्डलुम्।
ताम्रमयेन संशोध्य तथा स्त्रोदक जन्तना ॥ 27 ॥
शौचस्य हेमौ तु संशोध्य लेप गन्ध मलान्वितौ।
तत स्त्वा पूरयेत् पश्चाद् जस्त्र पूतेन वारिणा ॥ 28 ॥
पाद मार्जनं शौच मारभेत् सततं क्रमात्।
न किञ्चिल्लिलं स्पृशेत् तावद्यावद्धस्तौ बलौ कराङ्गुली ॥
स शुद्ध पाणि भूत्वा तो ज्ञाति कार्यं यथोदितम्।
नान्येन सेवितं वस्त्रं न शय्या न कमण्डलुम् ॥ 30 ॥
न जन्तुना कुलोद्भवं संसेवेत कदाचन।
आत्म शय्या च वस्त्रं च जाया पात्रं कमण्डलुम् ॥ 31 ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

140. D5550

अतोऽनेन इत्युच्चैरेतानि परेषां नश्युचिर्भवेत् ॥

॥श्रीसर्वज्ञानोत्तरे स्नानपटलं प्रकरणम् ॥

== ॐ. ==

॥इति सर्वज्ञानोत्तरपादः समाप्तः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection